॥ श्री: ॥

विद्याभवन संस्कृत ग्रन्थमाला
१४

श्रीकृष्णमिश्रयतिप्रणीतं

# प्रबोधचन्द्रोदयम्

'प्रकाश' नामक संस्कृत हिन्दीटीकोपेतम

टीकाकारः

पण्डित श्री रामचन्द्र मिश्रः
( प्राध्यापक, राजकीय संस्कृत महाविद्यालय, रांची )

JAIN BOOK DEPOT
C-4, Connaught Place, N. Delhi-1
Ph. 011-23416101 / 02 / 03, 011-66307233
Website: www.jainbookdepot.com
E-mail: sales@jainbookdepot.com

चौखम्बा विद्याभवन, वाराणसी-१

विद्याभवन संस्कृत ग्रन्थमाला
१४

श्रीकृष्णमिश्रयतिप्रणीतं

# प्रबोधचन्द्रोदयम्

'प्रकाश'-संस्कृत-हिन्दीटीकोपेतम्

टीकाकारः

आचार्यः श्रीरामचन्द्रमिश्रः
( प्राध्यापक, राजकीय संस्कृत महाविद्यालय, रांची )

चौखम्बा विद्याभवन
वाराणसी

( भारतीय संस्कृति एवं साहित्य के प्रकाशक तथा वितरक )
चौक ( बनारस स्टेट बैंक भवन के पीछे )
पो० बा० नं० १०६९, वाराणसी २२१००१
दूरभाष : ३२०४०४

सर्वाधिकार सुरक्षित

संस्करण १९९९ ई०
मूल्य ६०-००

अन्य प्राप्तिस्थान
चौखम्बा सुरभारती प्रकाशन
के० ३७/११७, गोपालमन्दिर लेन
पो० बा० नं० ११२९, वाराणसी २२१००१
दूरभाष : ३३३४३१

*

चौखम्बा संस्कृत प्रतिष्ठान
३८ यू. ए., बंगलो रोड, जवाहरनगर
पो० बा० नं० २११३
दिल्ली ११०००७
दूरभाष : २३६३९१

मुद्रक
फूल प्रिण्टर्स
वाराणसी

# PRABODHACANDRODAYA

OF

ŚRĪ KRṢṆA MIŚRA YATI

Edited with

*'Prakāśa' Sanskrit-Hindī Commentaries*

By

Pt. Srī RĀMACHANDRA MIŚRA
Professor, Govt. Sanskrit College, Ranchi.

THE
CHOWKHAMBA VIDYABHAWAN
VARANASI-1

VARANASI 221001

Reprint Edition
1999

*Also can be had of*
CHAUKHAMBA SURBHARATI PRAKASHAN
K. 37/117, Gopal Mandir Lane
Post Box No. 1129
VARANASI 221001

*

Chaukhamba Sanskrit Pratishthan
P. B. No. 2113
38 U.A., Jawahar Nagar, Bungalow Road,
DELHI-110007.
*Telephone : 236391*

रत्नम् , अस्य रचयितुः परिचयादिकमिदमीयं साहित्यिकं गौरवमन्यच्च ज्ञातव्यमग्र राष्ट्रभाषया लिखितमस्तीति तत एवावसेयम् ।

अस्य ग्रन्थस्य टीकाद्वयं मया दृष्टम्—१ एका नाण्डिल्लगोपमन्त्रिशेखरकृता २ अन्या रामदासदीक्षितकृता । आभ्यामतिरिक्तोऽस्याङ्ग्लभाषानुवादोऽपि दृष्टिपथं ममारूढः । तत्राद्यार्थबोधननिरपेक्षा सत्यपि शास्त्रीयतत्त्वप्रकाशनोन्मुखीति न तया महानुपकारः पठताम् , अपरा तु खण्डान्वयादेशा प्रवृत्ता छात्राणां कृते नितान्तव्यर्था, आङ्ग्लभाषानुवादश्चानुवाद एव, तदेवं सतीष्वपि तासु सहायिकासु व्याख्यासु सर्वसाधारणपाठकप्रौविध्यं मनसि निध्याय मयाऽयं प्रकाशोऽत्र योजितः, अथानया मम टीकया यदि सुधियां पाठकानामन्तेवासिनां च मनांसि विनोदितानि स्युस्तदाऽहमात्मनः परिश्रमं सफलं मन्येय ।

अयं ग्रन्थो नाटकान्तरविलक्षणो यतोऽत्र पात्राणि प्रतीकरूपेण कल्पितानि, लौकिकी कथा यथा झटिति हृदयमालोडयति शास्त्रीया कथा तथा त्वरया केषामेव च न भाग्यवैभवासादिततीव्रप्रातिभाणामन्तः प्रकाशत इति नाटकस्यास्य व्याख्यायां यथासंभवं मया ते ते प्राकरणिकाः पदार्थास्तत्र तत्र यथामति यथाऽवश्यकर्त च समावेशिताः । ईदृशानां ग्रन्थानां समादरपूर्वकाध्ययने प्रायः प्रौढा एव जनाः प्रवर्त्तन्ते वयःपरिमाणमपि स्वाभाविकीं शिक्षामनिच्छद्भ्योऽपि बलाद्वितरतीति विभाव्यातिविस्तृतितो विरज्य माध्यमिकः पन्था मयाऽत्राश्रितः । अथापि न परित्यक्ता आवश्यकाः प्रतिपाद्यपदार्थाः, नोपेक्षितं समयप्राप्तं विवेचनम् । सरलतासम्पादनायात्र मया विशिष्य प्रयतितम् । परिशिष्टे च ज्ञातव्याः सर्वेऽपि विषयाः समावेशिताः ।

ये स्वयमेतादृशीं व्याख्यां प्रतिपदं प्रकाशयन्ति ते किमर्थं मदीये व्याख्याने दृष्टिं दास्यन्ति ? ये च नितान्ताबोधाः सन्तोऽपि किमपि परकीयं यशो मलिनयेयमिति कृतसङ्कल्पा इव वृथैव परान्निन्दन्ति तेऽपि नास्या व्याख्याया लाभमादास्यन्ति, अथापि मध्यस्थाः सज्जनाः सकृदपि दृक्पातेन यदि ममेमं प्रयासं सफलयिष्यन्ति तदाऽहमात्मानं कृतकृत्यं मंस्ये । शमिति ।

रांची
जन्माष्टमी २०१२

विदुषां वशंवदः
**श्री रामचन्द्र मिश्रः**

# तृतीयोऽङ्कः

( ततः प्रविशति शान्तिः करुणा च )

शान्तिः—( सास्रम् ) मातः मातः, कासि । देहि मे प्रियदर्शनम् । तत

मुक्तातङ्ककुरङ्गकाननभुवः शैलाः स्खलद्वारयः
पुण्यान्यायतनानि संततपोनिष्ठाश्च वैखानसाः ।
यस्याः प्रीतिरमीषु साऽत्रभवती चण्डालवेश्मोदरं
प्राप्ता गौः कपिलेव जीवति कथं पाषण्डहस्तं गता ॥ १ ॥

अथवाऽलं जीवितसंभावनया । यतः—

साश्रम्–सरुदितम् । प्रियम्–इष्टम् ।

मुक्तातङ्केति० मुक्तः त्यक्तः आतङ्कः भयम् यैस्ते मुक्तातङ्काः निर्भयाः कुरङ्गा मृगाः येषु तादृशानि यानि काननानि वनानि तेषां भुवः पृथिव्यः निर्भयचरन्मृग काननधरण्यः, स्खलद्वारयः जलप्रपातयुक्ताः शैलाः पर्वताः, पुण्यानि पवित्राणि आयतनानि देवमन्दिराणि, सन्ततपोनिष्ठाः सदा तपस्यापरायणाः वैखानसा ऋषयः च, अमीषु अनन्तरमुक्तेषु पदार्थेषु यस्याः भवत्याः श्रद्धायाः प्रीतिः अनुराग सा अत्रभवती पूजनीया मम माता श्रद्धा पाषण्डहस्तं वेदबाह्यजनाधिकारम् गता चाण्डालवेश्मोदरम् चण्डालगृहमध्यम् प्राप्ता कपिला गौः इव कथं केन प्रकारेण जीवति ? याऽत्रभवती निर्भयसञ्चरन्मृगभूमिषु जलप्रपातशीतलितशिखरभूधरेषु पवित्रदेवतामन्दिरेषु ऋषिसाहचर्ये च प्रीतिं बिभर्ति, पाषण्डहस्तंगता सा चाण्डाल भवनमुपेता कपिला गौरिव कथं जीवनं यापयति ? अतिकष्टं भवत्या जीवनमित्यर्थः । स्पष्टमन्यत् । शार्दूलविक्रीडितं वृत्तम् ॥ १ ॥

अलं जीवितसंभावनया–सम्प्रति यावद् भवती जीवनं धारयन्ती भविष्यतीति कल्पना व्यर्थेत्यर्थः ।

( शान्ति तथा करुणाका प्रवेश )

शान्ति—( रोकर ) मां कहाँ हो ? मुझे दर्शन दो ।

निर्भय मृगयुक्त वनभूमि, झरनेवाले पर्वत, पुण्य आश्रम, तपोनिष्ठ मुनिजनसे जो स्नेह करती है, वह श्रद्धा पाखण्डोंके हाथ पड़कर चाण्डालके घरमें पड़ी गायकी तरह कैसे जीती होगी ? ॥ १ ॥

अथवा—जीते रहनेकी संभावना करना व्यर्थ है, क्योंकि—



मामनालोक्य न स्नाति न भुङ्क्ते न पिबत्यपः ।
न मया रहिता श्रद्धा मुहूर्तमपि जीवति ॥ २ ॥

तदिना श्रद्धया मुहूर्तमपि शान्तेर्जीवितं विडम्बनमेव । तत्सखि करुणे, मदर्थं चितामारचय । यावदचिरमेव हुताशनप्रवेशेन तस्याः सहचरी भवामि ।

करुणा—( सास्रम् ) सखि, एवं विषमज्वलनज्वालोल्कादुःसहान्यक्षराणि जल्पन्ती सर्वथा विलुप्तजीवितां मां करोषि । तस्मात्प्रसीदतु मुहूर्तं तावत् धारयतु प्रियसखी । यावदितस्ततः पुण्येष्वाश्रमेषु मुनिजनसमाकुलेषु भागीरथीतीरेषु निपुणं निरूपयामि कदाचिन्महामोहभीत्या कथ-

मामिति० माम् स्वदुहितरम् अनालोक्य अदृष्ट्वा न स्नाति न भुङ्क्ते भोजनं करोति, न अपः जलानि पिबति, ( तदेवम् ) मया शान्त्या रहिता वियुक्ता श्रद्धा मुहूर्तम् एकमपि क्षणं न जीवति प्राणान् धारयति । मद्दर्शननियतप्राणायास्तस्या मया वियोगे जीवनमशक्यसंभावनमिति भावः ॥ २ ॥

तत्–तस्मात्, ( यतो मद्वियोगे मम स्नेहेन मदीया माता श्रद्धा न जीवति तदुचितं तद्वियुक्ताया ममापि प्राणविसर्जनमिति ) विडम्बनम्–आडम्बरः । चिताम्–दाहौपयिकमग्निस्थानम् । आरचय–कुरुष्व । अचिरम्–शीघ्रम् । हुताशनप्रवेशेन–पावकप्रवेशेन । तस्याः–स्वमातुः श्रद्धायाः । सहचरी–समीपं गता ।

विषमेति० विषमा अतिदुःसहा, ज्वलनज्वाला वह्निदाहः, तस्याः उल्का तथा दुःसहानि सोढुमशक्यानि नितान्तकठोरतया मर्मव्यथकानि अक्षराणि–वाक्यानि । जल्पन्ती–अभिदधाना । विलुप्तजीविताम्–मृताम् । त्वदीयानि स्वप्राणविसर्जनतत्परताद्योतकतया मर्मच्छिन्दि वचनानि श्रुत्वा मदीयं जीवनं गतमिव जायते इति विलुप्तजीवितामित्युक्तेराशयः । प्रसीदतु–अनुग्रहं करोतु । इतस्ततः–यत्रतत्र । मुनिजनसमाकुलेषु–ऋषिकुलाक्रान्तेषु । भागीरथीतीरेषु–गङ्गातटेषु । निपुणं निरूपयामि–

जो श्रद्धा बिना मुझे देखे न नहाती है, न खाती है, न पानी ही पीती है, वह मुझसे बिछुड़ कर क्षणभर भी नहीं जी सकती है ॥ २ ॥

इसलिये श्रद्धाके बिना क्षणभरके लिये भी शान्तिका जीना विडम्बना है । सखी करुणे, मेरी चिता रच दे । मैं शीघ्र ही प्राण त्यागकर उसकी सहचरी हो जाऊं ।

करुणा—( रोकर ) सखि, इस प्रकार अतितीव्र उल्का समान अक्षरों का उच्चारण करके तुम हमारी जान ले रही हो । कृपाकर थोड़ी देर जीवन धारण करो, जब तक

मपि प्रच्छन्ना निवसति। ( सहि, एव्वं विसमजलणजालाउलक्काउःसहाइं अक्खराइं जप्पन्ती सव्वधा विलुत्तजीविदं मं करेसि। ता पसीददु मुहुत्तं जीविदं धारेदु पिअसही। जाव इदो तदो पुण्णेसु अस्समेसु मुणिअणसमाउलेसु भाईरहीतीरेसु णिउणं णिरुवेम्हि कआवि महामोहभीदिआ कहमवि पच्छण्णा णिवसदि )

शान्तिः—सखि, किमन्विष्यते। अन्वेषितैव—

नीवाराङ्कितसैकतानि सरितां कूलानि वैखानसै-
राक्रान्तानि समिच्चषालचमसव्याप्ता गृहा यज्वनाम्।
प्रत्येकं च निरूपिताः प्रतिपदं चत्वार एवाश्रमाः
श्रद्धायाः क्वचिदप्यहो खलु मया वार्तापि नाकर्णिता ॥ ३ ॥

साधु गवेषयामि। प्रच्छन्ना—गुप्ता। तावद्भवती मयि कृपां कृत्वा जीवनं धारयतु यावदहमिह पूतेषु मुन्याश्रमेषु गङ्गापरिसरेषु च श्रद्धां साधु गवेषयामि, सम्भाव्यते—कदाचिन्मोहाद्भीता सा क्वचिदत्र प्रच्छाद्यात्मानं स्थिता स्यादिति तात्पर्यम्।

किम् अन्विष्यते—वृथान्वेषणम्, नास्ति तदाप्तेः सम्भावनेति भावः। 'अन्वेषितैव' इत्यत्र मयेतिशेषः, मया कृतेऽन्वेषणे पुनस्त्वत्कर्तृकमन्वेषणं पिष्टपेषणकल्पमित्यर्थः।

नीवारेति० नीवारैः मुन्यन्नैः अङ्कितानि युक्तानि सैकतानि पुलिनानि येषान्तादृशानि वैखानसैः आक्रान्तानि अध्युषितानि सरिताम् नदीनाम् कूलानि तटप्रदेशाः, समिधः काष्ठानि, चषालः यूपकटकः, चमसाः यज्ञपात्राणि तैर्व्याप्ताः आकीर्णाः यज्वनाम् यज्ञकृतामध्वर्यूणम् गृहाः आश्रमाः, प्रतिपदम् अखिलेषु स्थानेषु प्रत्येकम् एकैकशः चत्वार एव चत्वारोऽपि आश्रमाः ब्रह्मचर्यगार्हस्थ्यवानप्रस्थसन्न्यासनामानः निरूपिताः सूक्ष्मेक्षिकया दृष्टाः, अहो आश्चर्यम्, क्वचिदपि एषु कुत्रापि मया श्रद्धायाः विश्वासापराभिधानायाः मानसिकनिष्ठायाः वार्त्ता कथा अपि न आकर्णिता श्रुता। नीवाराङ्कितपुलिनेषु सरित्तटेषु मुन्यधिष्ठितस्थानेषु याज्ञिकजनगृहेषु चतुर्ष्वपि चाश्रमेषु

इधर उधर पुण्याश्रम तथा मुनिजननिषेवित गङ्गातटमें अच्छी तरह ढूंढती हूँ। कदाचित महामोहके भयसे कहीं छिपी हुई हो।

शान्ति—सखि, क्या अन्वेषण करोगी, खोजा तो—

नीवारयुक्त तट वाले मुनिसेवित नदीकूल, समिध्, चषाल तथा चमससे पूर्ण याज्ञिकोंके घर, सर्वत्र खोज की गई, चारो आश्रमों में अन्वेषण किया, किन्तु श्रद्धा की चर्चा कहीं नहीं सुनी ॥ ३ ॥



करुणा—सखि, एवं भणामि। यदि सैव सात्त्विकी श्रद्धा तदा तस्या नेदृशीं दुर्गतिं संभावयामि। न खलु तादृश्यः पुण्यमय्यः सत्य एतादृशीमसंभावनीयां विपत्तिमनुभवन्ति। ( सहि, एव्वं भणामि। जइ सा जेव्व सत्तई सद्धा तदो ताए ण एरिसिं दुग्गदिं संभावेमि। ण खु तारिसीओ पुण्यमयी सदीओ एतारिसिं असंभावणिज्जं विपत्तिं अणुहवन्दि )

शान्तिः—सखि, किन्तु प्रतिकूले विधातरि न संभाव्यते। तथाहि—

श्रीदेवी जनकात्मजा दशमुखस्यासीद् गृहे रक्षसो
नीता चैव रसातलं भगवती वेदत्रयी दानवैः।

मया प्रतिपदं तिलशोऽन्वेषणं कृतमथापि मया श्रद्धाया वार्ताऽपि नाकर्णिता, एवंस्थितावपि भवती तदन्वेषणे प्रवर्त्तते, तत्र साफल्यस्याशा न कार्येति भावः। एवकारोऽप्यर्थकः, शङ्खः पाण्डुरेवेत्यत्र यथा। शार्दूलविक्रीडितमेव वृत्तम् ॥ ३ ॥

सात्त्विकी—सत्त्वगुणाधारा। श्रद्धायास्त्रैविध्यमुक्तं भगवता गीतायाम्—'त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा। सात्त्विकी राजसी चैव तामसी चेति तां शृणु ॥ यजन्ते सात्त्विका देवान्यक्षरक्षांसि राजसाः। प्रेतभूतगणांश्चान्ये यजन्ते तामसा जनाः' ॥ ईदृशीम्—न एतादृशीम्। दुर्गतिम्—पीडाम्। सात्त्विक्याः श्रद्धायाः सकलकल्याणकरत्वेन नेदृशी कष्टमयी दशा सम्भावनामारोहति 'न हि कल्याणकृत्तात दुर्गतिं जातु गच्छति' इति स्मरणात्।

तादृश्यः = श्रद्धासमाः। पुण्यमय्यः—पवित्राः। सत्यः—अदूषितचारित्राः। असम्भावनीयाम्—अनाशङ्कनीयाम्। विपत्तिम्—कष्टपरम्पराम्।

प्रतिकूले—पराङ्मुखे। विधातरि—ब्रह्मणि। विधौ विमुखे सर्वं सम्भाव्यतेऽतः श्रद्धाया अप्येतादृग् विपदुपनिपातो नात्यन्तासम्भाव्य इति भावः।

श्रीदेवीति० श्रीदेवी लक्ष्मीस्वरूपा देवतारूपा च जनकात्मजा सीता रक्षसः राक्षसस्य दशमुखस्य रावणस्य गृहे लङ्कायाम् नीता अपहृता आसीत्, भगवती विश्ववन्द्या वेदत्रयी ऋग्यजुःसामलक्षणा वेदत्रितयी चैव रसातलं पातालम् दानवैः दैत्यैः नीताऽऽ-

करुणा—सखि, मेरा यह कहना है—जो सात्त्विकी श्रद्धा है उसकी ऐसी दुर्गति को संभावना मैं नहीं करती हूं। वैसी पुण्यमयी इस तरह की विपत्तिका अनुभव नहीं कर सकती है।

शान्ति—भाग्य विपरीत होनेपर क्या नहीं हो सकता है? देखो—

देवी श्रीजनकात्मजाको राक्षसोंके घर रहना पड़ा था, वेदत्रयीको दानवोंने पाताल

गन्धर्वस्य मदालसां च तनयां पातालकेतुश्छलाद्-
दैत्येन्द्रोऽपजहार हन्त विषमा वामा विधेर्वृत्तयः ॥ ४ ॥

एवंविधिविलसितमेतदिति संप्रधारय। तद्भवतु। पाषण्डालयेष्वेव तावदनुसरावः।

करुणा—सखि, एवं भवतु। (सहि, एवं भोदु) (इति परिक्रामतः)

(अग्रतो विलोक्य)

करुणा—(सत्रासम्) सखि, राक्षसो राक्षसः। (सहि, रक्खसो रक्खसो)

शान्तिः—कोऽसौ राक्षसः?

करुणा—सखि, पश्य पश्य। य एष गलन्मलपिच्छिलबीभत्सदुःप्रे-

सीत्। गन्धर्वस्य देवयोनिभेदस्य मदालसां नाम तनयाम् पुत्रीम् दैत्येन्द्रः दानवमुख्यः पातालकेतुः तदाख्यः अपजहार हृत्वा स्वं लोकं नीतवान्। तदेतत्सर्वं सामान्यतोऽर्थान्तरन्यासेन समर्थयति—हन्त खेदे, विधेः ब्रह्मणः वृत्तयः व्यापाराः विषमाः कुटिलाः, कारणान्वेषणविधुरा इत्यर्थः। साक्षाल्लक्ष्मीस्वरूपायाः सीतायाः दशमुखकर्तृकापहरणे वेदत्रय्याश्च दैत्यैः पातालप्रापणे एवं मदालसानामिकाया गन्धर्वसुतायाः पातालकेतुद्वाराऽपहरणे विधेर्वामत्वादतिरिक्तं किमपि कारणमनुसन्धानदुरापं तदेवं श्रद्धाया अपि विपदुपनिपातो विधिवैपरीत्यप्रभव एवेति बोध्यम् ॥ ४ ॥

विधिविलसितम्–भाग्यकृत्यम्। एतत्–श्रद्धायाः कष्टम्। संप्रधारय–निश्चयेन विद्धि। पाषण्डालयेषु–वेदबाह्यजनगृहेषु राजसतामसश्रद्धयोर्भोजनानां भवनेष्विति हृदयम्।

य इति० गलता बहिर्भवता मलेन नासाक्षिकर्णादिकायच्छिद्रद्वारनिर्गतपाश्वादिमलेन पिच्छिलः आर्द्रो अत एव च बीभत्सा घृणाव्यञ्जिका दुःप्रेक्षा द्रष्टुमयोग्या

पहुँचा दिया, गन्धर्वकन्या मदालसाको दैत्येन्द्र पातालकेतुने छलसे हर लिया। विधाता की वृत्तियाँ बड़ी टेढ़ी हुआ करती हैं ॥ ४ ॥

ऐसा भाग्यका विधान है इसे समझो। अच्छी बात। पाखण्डालयमें खोजें।

करुणा—सखि, ऐसा ही हो। (चलती हैं)

(आगेकी ओर देखकर)

करुणा—(डरकर) सखि, राक्षस है राक्षस।

शान्ति—कहाँ राक्षस है?

करुणा—सखि, इधर देखो, देखो, मलके गिरते रहनेसे इसकी देह पिच्छिल हो



क्ष्यदेहच्छविः उल्लुञ्चितचिकुरमुक्तवसनदुर्दर्शनः शिखिशिखण्डपिच्छिकाहस्त इत एवाभिवर्तते। (सहि, पेक्ख पेक्ख। जो एसो गलन्तमलपिच्छिलबीहच्छदुप्पेक्खदेहच्छवी उल्लुंचिअचिउरमुक्कवसणदुद्दंसणो सिहिसिहण्डपिच्छिआहत्थो इदो जेव्व अहिवट्टदि)

शान्तिः—सखि, नायं राक्षसः। निर्वीर्यः खल्वयम्।

करुणा—तर्हि क एष भविष्यति। (ता को एसो भविस्सदि)

शान्तिः—सखि, पिशाच इति शङ्के।

करुणा—सखि, प्रस्फुरन्महामयूखमालोल्लासितभुवनान्तरे ज्वलति प्रचण्डमार्तण्डमण्डले कथं पिशाचानामवकाशः? (सहि, पप्फुरन्तमहामऊहमालोब्भासिअभुअणन्तरे जलदि प्पचण्डमात्तण्डमण्डले कहं पिसाआणं अवआसो?)

देहच्छविः कायकान्तिर्यस्य तादृशः। उल्लुञ्चितचिकुरः लुञ्चितकेशः, मुक्तवसनः नग्नश्च अत एव दुर्दर्शनः दर्शनायोग्यः। शिखिनो मयूरस्य शिखण्डिका पिच्छः हस्ते यस्य तादृशः। इत एवाभिवर्तते–इमामेव दिशमागच्छति। एतद्वर्णनं जैनसाधोः–तेषां मते स्नानं निषिद्धं तथाकरणे जीवविनाशसंभवात्, कचोल्लुञ्चनं विवसनत्वं चाचारपरिप्राप्तम्, शिखिपिच्छञ्च हस्ते मार्गावस्थितसूक्ष्मजन्तूनामपासनाय बिभ्रतीति तत्परिचायकेऽत्र वाक्ये सर्वमुपात्तम्।

निर्वीर्यः = पौरुषबलरहितः।

पिशाचः–प्रेतः। शङ्के–तर्कये। मलदिग्धत्वविवसनत्वादिमूलेयमुत्प्रेक्षा।

प्रस्फुरदिति० प्रस्फुरतः प्रकटस्य महामयूखस्य किरणस्य मालया समूहेन उल्लासितं भुवनान्तरं धरित्र्या अन्तरालं येन तादृशे। ज्वलति–दीप्यमाने। प्रचण्डमार्तण्डमण्डले–प्रखरसूर्यमण्डले। कथं पिशाचानामवकाशः–केन प्रकारेण प्रेतानां प्रचारस्यावसरः, ते हि तमसि सर्पन्ति ज्वलति चाधुना मध्यन्दिनतरणिः प्रखरैः स्वैः करैस्तदयं पिशाचो न संभवतीति भावः।

रही है, बाल नोच दिये गये हैं, कपड़ा नहीं है, हाथ में मयूरपिच्छिका है।

शान्ति—सखि, यह राक्षस नहीं है, यह निर्वीर्य है।

करुणा—तो फिर यह कौन है?

शान्ति—सखि, पिशाच मालूम पड़ता है।

करुणा—सखि, किरणों से भुवनको उद्भासित करनेवाले प्रचण्ड सूर्यमण्डलके सामने पिशाच कैसे होंगे?

शान्तिः—तर्हि अनन्तरमेव नरकविवरादुत्तीर्णः कोऽपि नारकी भविष्यति । ( विलोक्य विचिन्त्य च ) आः, ज्ञातम् । महामोहप्रवर्तितोऽयं दिगम्बरसिद्धान्तः । तत्सर्वथा दूरे परिहरणीयमस्य दर्शनम् । ( इति पराङ्मुखी भवति )

करुणा—सखि, मुहूर्तकं तिष्ठ । यावदत्र श्रद्धामन्वेषयामि । ( सहि, मुहुत्तअं चिट्ठ । जाव एत्थ । सद्धां अण्णेसामि )

( उभे तथा स्थिते )

( ततः प्रविशति यथानिर्दिष्टो दिगम्बरसिद्धान्तः )

दिगम्बरः—ॐनमोऽर्हद्भ्यः । नवद्वारपुरीमध्ये आत्मा दीप इव ज्वलति । एष जिनवरभाषितः परमार्थोऽयं मोक्षसुखदः । (इति परिक्रामति)

---

अनन्तरम्-इदानीम् । नरकविवरात्-रौरवादिनामकनरकबिलात् । उत्तीर्णः-बहिर्गतः । कोऽपि नारकी कश्चन नरकवासी । महामोहप्रवर्त्तितः-मोहेन प्रचारितः । दिगम्बरसिद्धान्तः-जैनमतप्रभेदः । परिहरणीयम्-त्याज्यम्, अर्हद्भ्यः-जैनमत ईश्वरस्य नाम अर्हन् इति तथा चोक्तम्—'अर्हन्नित्यथ जैनशासनरताः' इति । नवद्वारपुरी-नवेन्द्रिययुता तनुः । दीप इव ज्वलति-प्रदीपवत् प्रकाशते । अयं हि दिगम्बरसिद्धान्तः-अङ्गुष्ठपरिमाण एवात्मा हृत्पुण्डरीककोशमध्ये दीपवज्ज्वलति, गृहाभ्यन्तरवर्त्तिदीपप्रभावदङ्गुष्ठमात्रस्यैव जीवस्य सर्वदेहव्याप्तेः सुखदुःखादयो भोगार्थं शरीरे निःक्षिप्य बध्यते, तन्निवृत्तिश्च भगवतार्हता दर्शितैर्धर्मैः केशोल्लुञ्चनतप्तशिलाऽरोहणादिभिर्जायते, तथा च दिगम्बरश्रुतिः-'पञ्जरस्थः शुको यद्वद्विमुक्तो बन्धनाद् व्रजेत् । त्वरितं तद्वदेवात्मा विमुक्तश्चोर्ध्वगो भवेत्' । इति परमार्थः-सारभूतोऽर्थः । मोक्षसुखदः-मोक्षरूपपरमानन्दप्रदः । श्रावकाः-गृहस्था जनाः, ते हि श्रवणाधिकृतत्वात् श्रावका उच्यन्ते ।

---

शान्ति—तो फिर अभी अभी नरकसे निकला हुआ कोई नारकी होगा । ( देख तथा सोचकर ) अहा, समझ गया । यह तो महामोह-प्रवर्त्तित दिगम्बर मत है । इसके दर्शनसे बचना चाहिये । ( मुंह फेर लेती है )

करुणा—सखि, क्षणभर रुक जा, जबतक यहाँ श्रद्धाको खोज लूं ।

( दोनों खोजती हुई ठहरती हैं )

( यथावर्णित दिगम्बर मतका प्रवेश )

दिगम्बर—अर्हन् को नमस्कार है । नवद्वारपुरी के मध्यमें आत्मा दीपकी तरह जल



( आकाशे ) अरेरे श्रावकाः, शृणुध्वम्—

( कंणमो-अलिहन्ताणम् । णवदुवालअघलमज्झे अप्पा दीवेव्व जलदि । एसो जिणवलभासिदो पलमत्थो जं मोक्खसुखदो अलेले सावका, सुणुद्धं )—

मलमयपुद्गलपिण्डे सकलजलैरपि कीदृशी शुद्धिः ।
आत्मा विमलस्वभावः ऋषिपरिचरणैर्ज्ञातव्यः ॥ ५ ॥

( मलमअपुग्गलपिण्डे सअलजलेहिं वि केलिसा सुद्धी ।
अप्पा विमलसहाओ रुसिपलिचलणेहिं जाणव्वो ॥ )

किं भणथ कीदृशमृषिपरिचरणमिति । तच्छृणुध्वम्—

( किं भणत्थ केलिसं लिसिपरिचलणं ति । ता सुणुध )—

दूरे चरणप्रणामः कृतसत्कारं च भोजनं मिष्टम् ।
ईर्ष्यामलं न कार्यं ऋषीणां दारान् रममाणानाम् ॥ ६ ॥

( दूले चलणपणामो, किदसक्कालं च भोअणं मिट्ठम् ।
इस्सामलं ण कज्जं लिसिणं दालाणँ लमन्ताणम् ॥ )

---

मलमयेति० मलमये श्लेष्ममूत्रादिमलैः पूर्णे पुद्गलानां परमाणूनां पुञ्जरूपे पिण्डे देहे 'पुद्गलपिण्डे' देहे इति वा 'पुद्गलं वपुरात्मनः' इति धरणी । सकलजलैः समस्तैरपि वारिभिः कीदृशी किमाकारा शुद्धिः' सर्वस्मिन्नपि जले उपयुक्ते स्वाभाविकरूपेण मलवतोऽस्य देहस्य शुद्धिर्न संभवतीत्यर्थः । ( न चानेन कायिकमलेनात्मा लिप्यते) आत्मा विमलस्वभावः सहजनिर्मलः, स चात्मा ऋषिपरिचरणैः साधुसेवाभिर्ज्ञातव्यः । आत्मस्वरूपं प्रागुक्तम् ॥ ५ ॥

ऋषिपरिचरणैरात्मा ज्ञातव्य इत्युक्तं तत्र का ऋषिपरिचरणप्रक्रियेति वक्तुमाह—कीदृशमिति ।

दूरे इति० दूरदेशतः चरणप्रणामः पादवन्दनम्, शरीरस्पर्शस्तु न कार्यं इति भावः । कृतसत्कारं योग्यादरपूर्वकम् मिष्टं मधुरं भोजनम्, नैतावदेव, किन्तु

---

रही है । यही जिनवर-भाषित परमार्थ सिद्धान्त मोक्ष-सुखदाता है । अरे ओ श्रावको सुनो—

मलमय पुद्गलपिण्डरूप देहकी कैसी शुद्धि ? यह आत्मा विमल स्वभाव का है यह बात ऋषि-परिचर्यासे जानी जाती है ॥ ५ ॥

क्या कहा ? ऋषि-परिचर्या कैसे की जाती है ? तो सुन लो—

दूरसे चरणोंमें प्रणाम करो, सत्कारपूर्वक मधुर भोजन दो, यदि ऋषि तुम्हारी स्त्रियों के साथ विहार करें तो मनमें ईर्ष्या मत करो ॥ ६ ॥

( नेपथ्याभिमुखमवलोक्य )

श्रद्धे, इतस्तावत् । ( सद्धे, इदो दाव ) उभे सभयमालोकयतः । )

( ततः प्रविशति तदनुरूपवेषा श्रद्धा )

श्रद्धा—किमाज्ञापयति राजकुलम् । ( किं आणवेदि लाउलम् ) ( शान्तिर्मूर्च्छिता पतति )

श्रद्धा—यदाज्ञापयति राजकुलम् । ( जं आणवेदि लाउलम् ) ( इति निष्क्रान्ता )

करुणा—समाश्वसितु प्रियसखी । न खलु नाममात्रेण प्रियसख्या भेतव्यम् । यतः श्रुतं मया हिंसासकाशाद्यदस्ति पाषण्डानामपि तमसः सुता श्रद्धेति । तेनैषा तामसी श्रद्धा भविष्यति । ( समस्ससदु पिअसही । णं खु णाममेत्तकेण पियसहीए भेदव्वं । जदो सुदं मए हिंसासआसादो जं अत्थि

---

ऋषीणाम् साधूनाम् दारान् श्रावकजनवनिताः रममाणानाम् भुञ्जानानाम् ईर्ष्यामलम् कथमिमेऽन्येषां दारान् रमयन्तीत्येवं बुद्धिरीर्ष्यामलं तन्न कार्यम् , तेषां वीतबन्धनत्वाद्यथेच्छाचारस्याविगीतत्वात्तदुपदेशवशादेव च धर्मस्य व्यवस्थाप्यत्वात् ॥ ६ ॥

मूर्च्छिता—विगतचेतना, शान्तिः स्वमातरं श्रद्धां नितान्तभ्रष्टानां दिगम्बरसिद्धान्तानामालयेषु दृष्ट्वा स्वमातुर्दशापरिवर्त्तनेन पातित्यं सम्भाव्य मूर्च्छिता जातेति बोध्यम् ।

परिहरिष्यति-त्यक्ष्यति, यथामी श्रावका अस्मासु श्रद्धां कथमपि कदापि न जह्युस्तथा यतनीयं भवत्येति ।

नाममात्रेण-श्रद्धेति नामसादृश्येन नेयं भवत्या माता श्रद्धा, सा हि सात्त्विकी,

---

( नेपथ्यकी ओर देखकर )

श्रद्धे, जरा इधर आना । ( दोनों सभय देखती हैं )

( तदनुरूप वेशधारिणी श्रद्धाका प्रवेश )

श्रद्धा—राजकुलका क्या आदेश है ? ( शान्ति मूर्च्छित होकर गिर पड़ती है )

दिगम्बरसिद्धान्त—श्रावक-परिवारको क्षणभरके लिये भी मत छोड़ना ।

श्रद्धा—राजकुलकी जैसी आज्ञा । ( जाती है )

करुणा—धीरज धरो प्रियसखी, नाममात्रसे तुमको नहीं डरना चाहिये । मैंने सुना



पासण्डाणं वि तमसः सुदा सद्धेति । तेण एसा तामसी सद्धा भविस्सदि )

शान्तिः—( समाश्वस्य ) सखि, एवमेवैतत् । तथाहि—

दुराचारा सदाचारां दुर्दर्शा प्रियदर्शनाम् ।
अस्वामनुसरत्येषा दुराशा न कथंचन ॥ ७ ॥

तद्भवतु तावत् । सौगतालयेष्वप्यसावन्विष्यताम् ।

( शान्तिकरुणे परिक्रामतः )

( ततः प्रविशति भिक्षुरूपः पुस्तकहस्तो बुद्धागमः )

भिक्षुः—( विचिन्त्य ) भो भो उपासकाः,

सर्वे क्षणक्षयिण एव निरात्मकाश्च
यत्रार्पिता बहिरिव प्रतिभान्ति भावाः ।

---

अन्या चेयं श्रद्धातामसी, तन्नामसाम्येन स्वमातुः पातमुत्प्रेक्ष्यालं भयेनेति तात्पर्यम् ।

एवमेवैतत्-नामसाम्यमेवेदम् , इयमत्र दृश्यमाना तामसी श्रद्धैव, न मम मातेति बोध्यम् ।

दुराचारेति० दुराचारा । अशोभनाचारा दुर्दर्शा भीषणाकृतिः दुराशा नीचा इयम् तामसी श्रद्धा एषा सदाचाराम् चारित्रशुद्धाम् प्रियदर्शनाम् रमणीयाकृतिमनोहराम् अस्वाम् मम मातरं सात्त्विकीं श्रद्धाम् कथञ्चन केनापि प्रकारेण नैवानुसरति नानुकरोति । केवलं नामैव समानं नान्यत् किमप्यतो न मम मातेयमिति भावः ॥ ७ ॥

सौगतालयेषु-बौद्धगृहेषु असौ-सात्त्विकी श्रद्धा ।

पुस्तकहस्तः—हस्तधृतपुस्तकः । बौद्धा बुद्धोपदेशसङ्कलितं धर्मग्रन्थं सदा हस्ते धारयन्तीति रूढ्येत्थमुक्तम् । उपासकाः-बौद्धागमविचारतत्पराः ।

सर्वे इति० सर्वे भावाः पदार्थाः क्षणक्षयिणः क्षणभङ्गुरा निरात्मकाः असन्तश्च,

---

है कि हिंसाके मुंहसे पाखण्डियों के पास भी तामसी श्रद्धा रहती है । यह वही तामसी श्रद्धा होगी ।

शान्ति—( धीरज धर कर ) सखि, यही बात है, क्योंकि—

अभागी यह दुराचारा तथा दुर्दर्शना हमारी सदाचारा तथा प्रियदर्शना अम्बाका अनुसरण किसी तरह भी नहीं कर रही है ॥ ७ ॥

अच्छा, तो तबतक सौगतालयमें उसकी खोज की जाय । (शान्ति और करुणा चलती हैं)

( भिक्षुरूप पुस्तकहस्त बुद्धागमका प्रवेश )

भिक्षु—( सोचकर ) अरे ओ उपासको,

जिस धीसन्ततिमें अर्पित होनेसे सभी क्षणक्षयी तथा शून्यात्मकभाव बहिःस्थितकी

सैवाधुना विगलिताखिलवासनत्वा-
द्धीसन्ततिः स्फुरति निर्विषयोपरागा ॥ ८ ॥

( परिक्रम्य पुनः सश्लाघम् ) ( अहो, साधुरयं सौगतधर्मो यत्र सौख्यं मोक्षश्च । तथाहि—

आवासो लयनं मनोहरमभिप्रायानुरूपा वणिङ्-
नार्यो वाञ्छितकालमिष्टमशनं शय्या मृदुप्रस्तराः ।
श्रद्धापूर्वमुपासिता युवतिभिः क्लृप्ताङ्गदानोत्सव-

'यत्सत्तत् क्षणिकं यथा जलधरः सन्तश्च भावा अमी' इति प्रामाणिकोक्तेः । अमी क्षणभङ्गुरा निरात्मकाश्च भावाः यत्र यस्यां धीसन्ततौ विज्ञानधारायाम् अर्पिताः प्रतिफलिताः बहिरिव बाह्या इव प्रविभान्ति भासन्ते, एतन्मते सर्वेऽपि पदार्था ज्ञानाकारा एवेति । सैव धीसन्ततिः अधुना सम्प्रति विगलिताखिलवासनत्वात् सकलसंस्कारोच्छेदात् निर्विषयोपरागा विषयोपरक्तिरहिता स्फुरति प्रकाशते एतन्मते सांसारिकवासनाभिर्धीसन्ततौ प्रतिफलन्ति भावास्ते च क्षणभङ्गुराः सत्ताशून्याश्चापि सन्तः प्रतिभासमानशरीरा यावत् तिष्ठन्ति तावद्बन्धः, सांसारिकवासनाच्छेदे तु विषयोपरागराहित्येन शुद्धा धीसन्ततिः स्फुरति सैव दशा निर्वाणस्येति सिद्धान्तः । एतेन मुक्तोऽहमिति कथितम् । धीसन्ततिस्वरूपमाह धर्मकीर्त्तिः—'स्वाभाविकमेव संविदः स्वप्रकाशत्वं, विषयास्तत्र विम्बरूपं काशन्ते' इति । वसन्ततिलकं वृत्तम् ॥८॥

साधुः-प्रशस्यः । सुगतो बुद्धः, तस्यायं सौगतो धर्मः । सौख्यं कामनापूर्त्तिः । मोक्षः परमपदप्राप्तिः ।

आवास इति० मनोहरम् रमणीयम् लयनम् कुट्टिमगृहम् आवासः निवासस्थानम्, अभिप्रायानुरूपाः इच्छाऽनुरूपाः वणिङ्नार्यः श्रेष्ठिजनललनाः रूपाजीवा वेश्या वा, वाञ्छितकालम् इष्टे समये इष्टम् अभिलाषानुरूपम् अशनम् , मृदुप्रस्तराः कोमलास्तरणाः शय्याः । श्रद्धापूर्वम् एषां भिक्षूणां सेवा शरीरार्पणादिकर्मणाऽऽराधनम् बुद्ध-

तरह प्रतीत होते हैं, समस्त वासनाके विगलित हो जानेके कारण विषयोपरागशून्य वह धीसन्तति प्रकाशित हो रही है ॥ ८ ॥

( चलकर, प्रशंसासे ) अहा, धन्य है यह सौगतधर्म जिसमें सुख तथा मोक्ष दोनों हैं । क्योंकि—

रहनेके लिये कोठा, इच्छानुवर्त्तिनी सेठोंकी स्त्रियाँ, उचित समय पर मधुर तथा यथेष्ट भोजन, कोमल शय्या, श्रद्धासे युवतियाँ अङ्गदानपूर्वक उपासना करती हैं । उस



क्रीडानन्दभरैर्व्रजन्ति विलसज्ज्योत्स्नोज्ज्वला रात्रयः ॥ ९ ॥

करुणा—सखि, क एष तरुणतालतरुप्रलम्बो लम्बमानकषायपिशङ्ग-चीवरो मुण्डितसचूडमुण्डपिण्ड इत एवागच्छति । ( सहि, को एसो तरुणतालतुप्पलम्बो लम्बन्तकसाअपिसङ्गचिउरो मुण्डिदसचूडमुण्डपिण्डो इदो जेव्व आअच्छदि )

शान्तिः—सखि, बुद्धागम एषः ।

भिक्षुः—( आकाशे ) भो भो उपासकाः भिक्षवश्च, श्रूयतां भगवतः सुगतस्य वाक्यामृतम् । ( पुस्तकं वाचयति ) पश्याम्यहं दिव्येन चक्षुषा

प्रीतिकृते इति विश्वासपूर्वकम् क्लृप्ताङ्गदानोत्सवक्रीडानन्दभरैः सिद्धशरीरसमर्पणजन्यसुरतानन्दसमूहैः युवतिभिरारूढयौवनाभिरन्यनारीभिः उपासिताः विलसज्ज्योत्स्नोज्ज्वलाः स्फुटचन्द्रधवलाः रात्रयः व्रजन्ति । अस्माकं भिक्षूणां सौभाग्यमिदं यत्सुन्दरमावासस्थानं लभामहे, यथेच्छं वारनारीराश्लिष्यामः, उचिते समयेऽभिमतं भोजनं प्राप्नुमः, कोमलप्रच्छदपटं शयनीयमुपयुञ्ज्महे, युवतिभिः परस्त्रीभिः साधूनां सेवया भगवान् प्रसीदतीति विश्वासमन्तराधाय स्वयमागत्य रतिप्रार्थनायां क्रियमाणायां चन्द्रधवलासु निशासु ताभिः सह रमामहे इति । बौद्धमते बौद्धपरिव्राजकलिङ्गपूजां स्त्रियो निजपत्यनुमत्यैव कुर्वन्तीति प्रसिद्धिः । एतेनास्माकं भिक्षूणां भोगेन सहैव मोक्षोऽप्युपपद्यत इति परमं सौभाग्यमस्माकमन्येषान्तु न तथेति स्वमते व्यतिरेक उक्तः । शार्दूलविक्रीडितमेव वृत्तम् ॥ ९ ॥

तरुणतालतरुप्रलम्बः-प्रौढतालवृक्षदीर्घः । लम्बमानम् आस्तीर्यमाणम् कषायपिशङ्गरक्तं कषायपिशङ्गवर्णं चीवरं बृहदाकृतिपरिधानं यस्य तादृशः । मुण्डितसचूडमुण्डपिण्डः-कारितसशिखशिरोवपनः ।

उपासकाः-बौद्धमते श्रद्धालवो गृहस्थाः । वाक्यामृतम्-वचनसुधाम्, वचनानां सर्वविधसन्तापहरत्वेन सुधात्वमुपचरितम् । सुगतिम्-सत्कर्म । दुर्गतिम्-दुष्कर्म ।

तरह चन्द्रिकाधवल रात्रियाँ आनन्दमें कटती हैं ॥ ९ ॥

करुणा—यह कौन है जो ताड़की तरह लम्बा, लटकता हुआ केसरिया चोगा पहने शिखा समेत सिर घुटवाये इधर ही आ रहा है ।

शान्ति—सखि, यह बुद्धागम है ।

भिक्षु—( आकाशकी ओर ) अरे ओ उपासको और भिक्षुओ, भगवान् सुगतके वचनामृत सुनलो । ( पुस्तक बाँचता है ) मैं दिव्य दृष्टिसे लोगोंकी सुगति तथा दुर्गति देखा

लोकानां सुगतिं दुर्गतिं च । क्षणिकाः सर्वे संस्काराः । नास्त्यात्मा स्थायी । तस्माद्भिक्षुषु दारानाक्रमत्सु नेर्ष्यितव्यम् । चित्तमलं हि तद्यदीर्ष्यानाम । ( नेपथ्याभिमुखमवलोक्य ) श्रद्धे, इतस्तावत् ।

( प्रविश्य श्रद्धा )

श्रद्धा—आज्ञापयतु राजकुलम् । ( आणवेदु लाउलम् )

भिक्षुः—उपासकान्भिक्षूंश्च चिरमालिङ्ग्य स्थीयताम् ।

श्रद्धा—यदाज्ञापयति राजकुलम् । ( जं आणवेदि लाउलम् ) [ इति निष्क्रान्ता ]

शान्तिः—सखि, इयमपि तामसी श्रद्धा ।

करुणा—एवमेतत् । ( एवं णेदम् ) ।

क्षपणकः—( भिक्षुमालोक्योच्चैःशब्दम् ) । अरेरे भिक्षुक, इतस्तावत् । किमपि पृच्छामि । ( अलेले भिक्खुअ, इदो दाव । किंपि पुच्छिस्सम् )

नास्त्यात्मा स्थायी–सर्वेषां भावानां क्षणिकत्वेनात्मनोऽप्यस्थायित्वं निवेदितमेव, दारान्–स्त्रियः, उपासकानाम् इति शेषः । आत्मनोऽस्थायित्वे.येनात्मना परपुरुषोपसर्पणं कृतं स तु गत एवेति वृथा कोपं स्त्रीणां भिक्षुरतौ मा कारीति भावः । चित्तमलम्–मनोमालिन्यकरम्, तच्च ज्ञानपरिपन्थीति तन्नकार्यमिति भावः । उपासकान्–श्रद्धायुक्तान्गृहिणः, चिरम्–बहुकालपर्यन्तम् । तामसश्रद्धावश्य एव गृहस्था भिक्षुभ्यो निजदारानुपहरिष्यन्तीति तदुपायमेवान्येन वाक्येन कृतवानयं भिक्षुरिति तात्पर्यम् ।

क्षपणकः—जैनागममतावलम्बी दिगम्बरः ।

करता हूं । सभी संस्कार क्षणिक हैं । स्थायी आत्मा नहीं है । अतः भिक्षु यदि स्त्रियों पर आक्रमण करे तो ईर्ष्या मत करना । ईर्ष्या चित्तका मल है । ( नेपथ्य की ओर देखकर ) श्रद्धे, जरा इधर आना ।

( श्रद्धाका प्रवेश )

श्रद्धा—राजकुलका क्या आदेश है ?

भिक्षु—उपासकों तथा भिक्षुओंसे सदा लिपटी रहो ।

श्रद्धा—राजकुलकी जैसी आज्ञा । ( जाती है )

शान्ति—सखि, यह भी तामसी श्रद्धा है ।

करुणा—यही बात है ।

क्षपणक—( भिक्षुको देखकर, जोरसे ) अरे ओ भिक्षुक, इधर आना । कुछ तुम्हें पूछूंगा ।



भिक्षुः—( सक्रोधम् ) आः पाप पिशाचाकृते, किमेवं प्रलपसि ।

क्षपणकः—अरे, मुञ्च क्रोधम् । शास्त्रगतं पृच्छामि । ( अले, मुञ्च कोहम् । सात्थगदं पुच्छामि )

भिक्षुः—अरे क्षपणक, शास्त्रकथामपि वेत्सि । भवतु । प्रतीक्षामस्तावत् । ( उपसृत्य ) किं पृच्छसि ।

क्षपणकः—भण तावत्क्षणविनाशिना त्वया कस्य कृते इदं व्रतं धार्यते । ( भण दाव क्खणविणासिणा तुए कस्स किदे एदं व्वदं धालीअदि )

भिक्षुः—अरे श्रूयताम् । अस्मत्संततिपतितः कश्चिद्विज्ञानलक्षणः समुच्छिन्नवासनो मोक्ष्यते ।

क्षपणकः—अरे मूर्ख, कस्मिन्नपि मन्वन्तरे कोऽपि मुक्तो भविष्यति ।

पिशाचाकृते–पिशाचसमानाकृतिशालिन् ।

क्षणविनाशिना–क्षणविनाशि सर्वमिति मन्यमानेन । अयमाशयः–यस्य मते सर्वं क्षणिकं तस्यात्माऽपि क्षणिकः, तर्हि किमर्थं व्रतादिकष्टं क्रियेत, येन व्रतं क्रियते तस्य तत्फलभोगायास्थायित्वादिति ।

अस्मत्सन्तीति० भावानां क्षणिकत्वं ज्ञानाकारत्वं चातिष्ठमाना बौद्धा धीसन्ततिमनुवर्त्तमानामभिमयन्ति तेनैव शरीरपातप्रसङ्गमापाद्यमानं वारयन्ते, तदभिप्रायेणेदमुत्तरम् , अस्मात् सन्ततिपतितः–अहं व्रतकर्त्ता यद्धीसन्ततौ तद्धीसन्ततौ भावी कोऽपि मोक्ष्यते, तेन व्रतानुष्ठायिमोक्ष्यमाणयोरेकसन्ततिगतत्वेन व्रतमोक्षयोर्न वैयधिकरण्यमिति न त्वदुक्तदूषणावकाशः । समुच्छिन्नवासनः–नष्टवासनः, वासनानाशो मोक्षहेतुः स च व्रतादिकायक्लेशसाध्य इति बौद्धप्रसिद्धिमनुरुध्योक्तम् ।

मन्वन्तरे–कतिपययुगानन्तरे ।

भिक्षु—( क्रोधसे ) आः पाप पिशाचाकृते, क्या बक-बक कर रहा है ।

क्षपणक—अरे, क्रोध छोड़ो, शास्त्रगत बात पूछनी है ।

भिक्षु—अरे क्षपणक, तू शास्त्रकी बातें भी जानता है । अच्छी बात है । मैं इन्तजार करूंगा । ( समीप जाकर ) क्या पूछता है ।

क्षपणक—तू क्षण विनाशी है तो फिर किसके लिये यह व्रत करता है ।

भिक्षु—अरे, सुनो, हमारी सन्ततिमें पतित कोई विज्ञानलक्षण निवृत्तवासन होगा । उसे मोक्ष होगा ।

क्षपणक—अरे मूर्ख, किसी मन्वन्तरमें कोई मुक्त होगा, तुम जो इस समय कष्ट उठा

ततस्ते सांप्रतं नष्टस्य कीदृशमुपकारं करिष्यति । अन्यच्च पृच्छामि । केन ते ईदृशो धर्म उपदिष्टः ? ( अले मुलुक्ख, कस्सिवि मण्णन्तले कोवि मुक्को भविस्सदि । तदो दे संपदं णट्ठस्स कीरिसं उवआलं कलिस्सदि । अण्णं च पुच्छामि । केण दे ईरिसो धम्मो उवदिट्ठो ? )

भिक्षुः—नूनं सर्वज्ञेन भगवता बुद्धेनोक्तोऽयमेव धर्मः ।

क्षपणकः—अरे, सर्वज्ञो बुद्ध इति कथं त्वया ज्ञातम् । ( अले, सव्वण्णो बुद्धोत्थि त्ति कधं तुए णादम् )

भिक्षुः—ननु रे, तदागमैरेव प्रसिद्धो बुद्धः सर्वज्ञ इति ।

क्षपणकः—अरे उज्झितबुद्धिक, यदि तस्य भाषितेन सर्वज्ञत्वं प्रतिपन्नोऽसि तदहमपि सर्वं जानामि । त्वमपि पितृपितामहैः सह सप्तपुरुषमस्माकं दास इति । ( अले, उज्झिअबुद्धिअ, जयि तस्स भासिदेण सव्वण्णत्तं पडिवज्जेसि ता अहं वि सव्वं जाणामि । तुमंपि पिदुपिदामहेहिं सद्धं सत्तपुलिसं अम्हाणं दासो त्ति )

भिक्षुः—(सक्रोधम्) आः पाप, पिशाच मलपङ्कधर, कस्तवाहं दासः ?

---

नष्टस्य-मृतस्य । तदागमैः-बुद्धागमैः ।

उज्झितबुद्धिक निर्बुद्धे तस्य-बुद्धस्य । प्रतिपन्नः-ज्ञातवान् । 'अहमपि सर्वं जानामि' इति मदुक्त्या ममापि सर्वज्ञत्वं प्रतिपद्यस्व, बुद्धस्य सर्वज्ञतां यथा तदुक्तौ विश्वस्य प्रतिपन्नोऽसि तथैव मदुक्तौ विश्वस्य ममापि सर्वज्ञतां प्रति विश्वासं कुर्विस्याशयः ।

पाप-पापाचार । पिशाच-राक्षसवद्भयदर्शन । मलपङ्कधर-मलिनतनो ।

---

रहे हो वह तुम्हारा क्या उपकार करेगा । और मैं पूछता हूं किसने तुम्हें इस तरहका धर्मोपदेश किया ?

भिक्षु—सर्वज्ञ भगवान् बुद्ध ने यह उपदेश किया है, यही धर्म है ।

क्षपणक—अरे, बुद्ध सर्वज्ञ हैं यह तुमको किसने बताया ?

भिक्षु—उनके शास्त्रमें बुद्धको सर्वज्ञता प्रसिद्ध है ।

क्षपणक—अरे निर्बुद्धि, यदि उसीके कहनेसे उसे सर्वज्ञ मानता है तो मैं भी सर्वज्ञ हूं, बाप-दादों के सहित तुम भी हमारे दास हो ।

भिक्षु—( क्रोधसे ) अरे पाप, मलपङ्कधर, मैं तुम्हारा कैसा दास हूं ?



क्षपणकः—अरे विहारदासीभुजङ्ग दुष्टपरिव्राजक, दृष्टान्त एष मया दर्शितः । तत् प्रियं ते विस्रब्धं भणामि । बुद्धानुशासनं परिहृत्यार्हतानुशासनमेवानुसृत्य दिगम्बरमतमेव धारयतु भवान् । ( अले विहालदासीभुअङ्ग दुट्ठपलिव्वजिअ, दिट्ठंदो एसो मए दंसिदो । ता पिअं दे विस्सद्धं भणामि । बुद्धाणुसासणं पलिहलिअ अलिहन्ताणुसासणं जेव्व अनुसलिअ दिअवलमदं जेव्व धालेदु भवम् )

भिक्षुः—आः पाप, स्वयं नष्टः परानपि नाशयितुमिच्छसि ।

स्वाराज्यं प्राज्यमुत्सृज्य लोके निन्द्यामनिन्दितः ।
अभिवाञ्छति को नाम भवानिव पिशाचताम् ॥ १० ॥

अपि च, आर्हतमपि धर्मवेदनं कः श्रद्दधाति ?

---

विहारदासीभुजङ्ग-वेश्यामर्त्तः । दृष्टान्तः-निदर्शनम् । यथा बुद्धोक्तौ विश्वस्य तदीयां सर्वज्ञतां प्रतिपन्नोऽसि तथा मदीयोक्तौ विश्वस्य स्वस्य मम दासत्वमपि त्वया स्वीकर्त्तव्यमिति दृष्टान्तो मया दर्शितो न तु वास्तविके तव दासत्वे मम तात्पर्यमिति ।

विस्रब्धम्-विश्वस्तम् । बुद्धानुशासनम्-बौद्धमतम् । परिहृत्य-त्यक्त्वा । आर्हतानुशासनम्- जैनमतम् । दिगम्बरमतम्-जैनमतैकदेशम् ।

नष्टः—पतितः । नाशयितुम्-पातयितुम्, जैनमतं धारयित्वा भ्रंशयितुमित्यर्थः ।

स्वाराज्यमिति० प्राज्यं प्रकृष्टम् स्वाराज्यम् उत्सृज्य त्यक्त्वा भवानिव भवद्वत् लोकनिन्द्याम् शास्त्रगर्हिताम् पिशाचताम् क्षपणकत्वम् को नाम अभिवाञ्छति । यथा भवानिह मते विश्वस्य पिशाचतां गतः तथा कोऽन्यो बौद्धो नित्यस्वातन्त्र्यं परित्यज्य पिशाचभावं भजतामित्यर्थः ॥ १० ॥

धर्मवेदनम्-धर्मज्ञानम् ।

---

क्षपणक—अरे विहारदासीभुजङ्ग, दुष्ट परिव्राजक, मैंने यह दृष्टान्त दिखलाया है । विश्वसनीय हित तुम्हें कह रहा हूं कि बुद्धमत छोड़कर जैनमतमें दिगम्बर जैन सिद्धान्तको अपना लो ।

भिक्षु—अरे पापी, तू खुद पतित है, अब दूसरोंको गिराना चाहता है ।

प्रचुर स्वाराज्य छोड़कर कौन अनिन्दित बन तुम जैसे इस निन्द्य पिशाचताको ग्रहण करना चाहेगा ॥ १० ॥

और—आर्हत मत पर श्रद्धा ही किसे है ?

क्षपणकः—ग्रहनक्षत्रचारचन्द्रसूर्योपरागलुप्तलाभपरमार्थज्ञानसंधानदर्शनेन निरूपितं सर्वज्ञत्वं भगवतोऽर्हतः। ( ग्गहणक्खत्तचालचन्दसूरोपलाअलुप्पलाहपलमत्थाण्णाणसंधाणदंसणेण णिलुविदं सव्वण्णत्तणं भअवदो अलिहन्तस्स )

भिक्षुः—अरे, अनादिप्रवृत्तज्योतिषातीन्द्रियज्ञानेन प्रतारितेन भगवतेदमतिकष्टं व्रतमाश्रितम्। तथाहि—

ज्ञातुं वपुः परमितः क्षमते त्रिलोकीं
जीवः कथं कथय संगतिमन्तरेण।
शक्नोति कुम्भनिहितः सुशिखोऽपि दीपो
भावान्प्रकाशयितुमप्युदरे गृहस्य ॥ ११ ॥

ग्रहाः—सूर्यचन्द्रादयः नक्षत्राणि—अश्विन्यादयः। तेषाञ्चारः—नियतमार्गं नियतकालं च सञ्चरणम्। चन्द्रसूर्योपरागः—सूर्यग्रहणं चन्द्रग्रहणञ्च। लुप्तलाभः—पृथिव्यादौ निखाय स्थापितस्य धनस्य लुप्तस्य लाभः। अथवा सद्य एवादर्शनं गमितस्य पदार्थस्य लाभः। परमार्थज्ञानम् तत्त्वज्ञानम्। यदस्माकमर्हन् ग्रहनक्षत्रचारचन्द्रग्रहणलुप्तलाभादिकं साधारणजनदुर्बोधमाह्वातोऽसौ सर्वज्ञ इति प्रतीत इति भावः।

अनादिप्रवृत्तज्योतिषातीन्द्रियज्ञानेन—चिरकालप्रचलितगणितद्वारेण पूर्वोक्तज्ञानं जायते तेन।

ज्ञातुमिति० वपुःपरिमितः शरीरपरिमाणः जीवः विज्ञानरूपः सन् सङ्गतिमन्तरेण सन्निकर्षं विना त्रिलोकीम् भुवनत्रयम् सर्वमित्यर्थः कथं केन प्रकारेण ज्ञातुं क्षमते शक्नोति इति कथय ब्रूहि। शरीरपरिमाणो जीवः सकलस्य त्रिभुवनस्य सङ्गतिमन्तरेण तज्ज्ञाने कथं शक्नोति, यदसौ सर्वज्ञः स्वीक्रियतामित्यर्थः। तत्र दृष्टान्तः—कुम्भनिहितः घटान्तरवस्थापितः सुशिखः समिद्धशिखायुक्तोऽपि दीपः (किम्) गृहस्य उदरे भावान् पदार्थान् प्रकाशयितुं भासयितुं शक्नोति? यथा घटान्तरवस्थापितः सुशिखोऽपि दीपः स्वां भासं बहिर्नेतुमसमर्थतया गृहान्तर्गतपदार्थानां प्रकाशने न क्षमते तथैव जीवोऽपि शरीरपरिणामतया दूरस्थवस्तुभिः सहसन्निकर्षमनासादयन्न तेषां ज्ञाने कथमपि शक्तः स्यादिति परमार्थः ॥ ११ ॥

क्षपणक—ग्रहनक्षत्रकी गति, चन्द्र-सूर्यग्रहण, गुप्तवस्तुकी प्राप्ति, परमार्थज्ञान आदिसे अर्हन्‌की सर्वज्ञता सिद्ध हो चुकी है।

भिक्षु—अरे, अनादि-प्रवृत्त ज्योतिषसे होनेवाले अतीन्द्रिय-विषयक ज्ञानसे वञ्चित हो अर्हन्‌ने इस महाकष्टको स्वीकार किया है। क्योंकि—

शरीरपरिमाण जीव बिना सन्निकर्षके त्रिलोकीको कैसे जान सकेगा? क्या कुम्भनिहित दीप प्रकाशशील होने पर भी घरके तमको दूर कर सकता है ॥ ११ ॥



तस्माल्लोकद्वयविरुद्धादार्हतमताद्वरं सुगतमतमेव साक्षात्सुखावहमतिरमणीयं पश्यामः।

शान्तिः—सखि, अन्यतो गच्छावः।

करुणा—एवं भवतु। (एवं भोदु)। (इति परिक्रामतः)

शान्तिः—(पुरो विलोक्य) एष पुरस्तात्सोमसिद्धान्तः। भवतु। अत्रापि तावदनुसरावः।

(ततः प्रविशति कापालिकरूपधारी सोमसिद्धान्तः।)

सोमसिद्धान्तः—(परिक्रम्य)

नरास्थिमालाकृतचारुभूषणः
श्मशानवासी नृकपालभोजनः।

लोकद्वयविरुद्धात्—लोकद्वयम् आगमिकानागमिकरूपसमुदायद्वितयम्। ततो विरुद्धात्। यद्वा लोकद्वयम् इह लोकपरलोकौ जनानां नास्ति तावदिहलोकः पिशाचरूपताऽऽस्थानात्, न वा परलोकोऽप्यस्ति, सततोर्ध्वगमनरूपक्लेशस्य भोक्तव्यत्वात्। सुगतम्—बुद्धमतम्। साक्षात्सुखावहम्—सद्य आनन्दकरम्। सोमसिद्धान्तः—कापालिकमतम्।

नरास्थिमालेति० नराणाम् मनुष्याणाम् अस्थ्नाम् मालया स्रजा कृतं विहितं भूषणं यस्य तादृशः मनुष्यास्थिमालाभूषितः श्मशानवासी पितृवसतिनिवासशीलः नृकपालभोजनः नरमुण्डे भोजनरसिकः (एवंविधः कापालिकदीक्षितोऽहम्) योगाञ्जनदिव्यचक्षुषा समाविरूपाञ्जनप्रयोगवशलब्धालौकिकशक्तिशालिना नयनेन मिथोभिन्नम् परस्परविरुद्धम् जगत् सांसारिकं पदार्थजातम् ईश्वरादभिन्नम् अव्यतिरेकि

इसलिये इहलोक तथा परलोकसे विरुद्ध आर्हत मतकी अपेक्षा साक्षात्सुखप्रद बौद्ध मत ही अच्छा दीख पड़ता है॥

शान्ति—सखि, दूसरी ओर चलें।

करुणा—अच्छी बात है। (चलती है)

शान्ति—(आगे देखकर) यह आगे वाला सोमसिद्धान्त है, अच्छा, यहां भी चलें।

(कापालिक रूपधारी सोमसिद्धान्तका प्रवेश)

सोमसिद्धान्त—(चलकर)

नरास्थिमालाका भूषण पहने, नृकपालभक्षी तथा श्मशानवासी मैं योगाञ्जन सिद्ध-दृष्टिसे

पश्यामि योगाञ्जनशुद्धचक्षुषा
जगन्मिथो भिन्नमभिन्नमीश्वरात् ॥ १२ ॥

क्षपणकः—क एव कापालिकं व्रतं पुरुषो धारयति । तदेनमपि पृच्छामि । ( उपसृत्य ) अरेरे कापालिक, नरास्थिमुण्डमालाधारक, कीदृशस्तव धर्मः कीदृशस्तव मोक्षः ? ( को एसो कावालिअव्वदं पुलिसो धालेदि । ता णं वि पुच्छिस्सम् । अलेले कावालिअ, णलाथिमुण्डमालाधारिअ, कीलिसो तुम्ह धम्मो, कीलिसो तुम्ह मोक्खो ? )

कापालिकः—अरे क्षपणक, धर्मं तावदस्माकमवधारय ।

मस्तिष्कान्त्रवसाभिपूरितमहामांसाहुतीर्जुह्वतां
वह्नौ ब्रह्मकपालकल्पितसुरापानेन नः पारणा ।
सद्यः कृत्तकठोरकण्ठविगलत्कीलालधारोज्ज्वलै-
रर्च्यो नः पुरुषोपहारबलिभिर्देवो महाभैरवः ॥ १३ ॥

पश्यामि । उच्चावचोऽयं प्रपञ्चः स्वयं परस्परभिद्यमानोऽपि न परमेश्वराद्भिद्यते यथा मुद्रिकाकङ्कणादेरन्योन्यभेदेऽपि सुवर्णादभिन्नता तद्वद् इति पश्यामीति भावः ॥१२॥

कापालिकम्–कपाली शिवस्तद्देवताकम् । अवधारय–जानीहि ।

मस्तिष्कान्त्रेति० मस्तिष्कम् कपालान्तर्गतं स्निग्धं द्रव्यम् , अन्त्राणि सिराः, वसा मज्जा, ताभिः अभिपूरितैः आधारितैः महामांसैः नरमांसैः वह्नौ आहुतीर्जुह्वताम् होमं कुर्वताम् नः अस्माकम् ब्रह्मकपाले ब्राह्मणजातिनरमुण्डे कल्पितायाः उपनीतायाः सुरायाः मदिरायाः पानेन पारणा व्रतसमाप्तिः भवतीति शेषः । नराणां मांसानि तत् कपालगतस्निग्धद्रव्यतदन्त्रतन्मज्जभिराधार्यं वह्नौ जुह्वतो वयं ब्राह्मणजातिनृमुण्डे स्थापितया सुरया पीतया व्रतं समापयाम, इत्यर्थः । ( किञ्च ) सद्यःकृत्तेभ्यः तत्क्षणखण्डितेभ्यः कठोरकण्ठेभ्यः सबलजनदृढगलेभ्यः विगलताम् चरताम् कीलालानां रक्तानाम् धाराभिः उज्ज्वलैः प्रकाशितैः पुरुषोपहारबलिभिः नरबलिभिः देवः महाभैरवः कालभैरवः नः अस्माकम् अर्च्यः पूज्यः । महाभैरवस्य पूजायां गलस्रवद्रक्तनरबलिमुपहारीकुर्म इत्युत्तरार्द्धार्थः । अत्र क्षपणकेन पृष्टस्य कीदृशस्तव धर्मो मोक्षश्च तव कीदृश इति प्रश्नद्वयस्य क्रमशो दत्तमुत्तरमिति बोध्यम् । तत्राद्य पादद्वयेन प्रथमः प्रश्नः समाहितः, सद्यःकृत्तेत्यादिना च भैरवोपासनावशात्प्राप्तकैलासवास एव मोक्ष इति च प्रतिपादितं द्वितीयप्रश्नस्योत्तरमिति विवेकः । शार्दूलविक्रीडितं वृत्तम् ॥ १३ ॥

जगत्को ईश्वरसे भिन्न तथा अभिन्न देखता हूं ॥ १२ ॥

क्षपणक—यह कौन पुरुष कापालिक व्रत धारण किये हुए है ? इससे भी पूछूं । ( समीप जाकर ) अरे कापालिक, नरास्थिमुण्डमालाधारी, कैसा तुम्हारा धर्म तथा कैसा तुम्हारा मोक्ष है ?

कापालिक—अरे क्षपणक, हमारा धर्म सुनले—

मस्तिष्क, आंत, मज्जा, आदिसे युक्त नरमांसकी वह्निमें आहुति कर ब्रह्मकपालस्थित सुरापानसे पारणा होती है । सद्यः खण्डित कण्ठसे निकलते हुए शोणितकी धार वाली नरबलिसे हम महाभैरव की अर्चा करते हैं ॥ १३ ॥



भिक्षुः—( कर्णौ पिधाय ) बुद्ध बुद्ध, अहो दारुणा धर्मचर्या ।

क्षपणकः—अर्हन् अर्हन् , अहो घोरपापकारिणा केनापि विप्रलब्धो वराकः । (अलिहन्त अलिहन्त, अहो घोलपावकालिणा केणावि विप्पलद्धो वलाओ)

कापालिकः—( सक्रोधम् ) आः पाप पाखण्डापसद, मुण्डितमुण्डचूडाकेश, केशलुञ्चक. अरे, विप्रलम्भकः किल चतुर्दशभुवनोत्पत्तिस्थितिप्रलयप्रवर्तको वेदान्तप्रसिद्धसिद्धान्तविभवो भगवान्भवानीपतिः । दर्शयामस्तर्हि धर्मस्यास्य महिमानम ?

बुद्ध बुद्धेति स्वेष्टदेवस्मरणं घृणातिशयव्यञ्जनाय, आस्तिकानां बीभत्सदृश्यदर्शने यथा राम रामेति प्रयोगः, दारुणा–कठोरा, नरबलिदानेन दारुणत्वम् ।

अर्हन्नर्हन्नित्यपि पूर्ववदेव घृणाव्यक्त्यै । घोरपापकारिणा–अतिपापाचारिणा । विप्रलब्धः–वञ्चितः । वराकः–दयनीयोऽयम् ।

पाखण्डापसद–नीचपाखण्ड । मुण्डितमुण्डचूडाकेश–कर्त्तितसशिखकचराशे, इदं बौद्धमुद्दिश्य संबोधनम् । केशलुञ्चक–लुञ्चितकच, इदं जैनसंबोधनम् । अरे इति क्रोधे संबोधनम् । चतुर्दशभुवनोत्पत्तिस्थितिप्रलयप्रवर्त्तकः–सकलजगदुत्पादनसत्ताभङ्गप्रयोजकः । वेदान्तप्रसिद्धसिद्धान्तविभवः–उपनिषदभिमतमतः । भगवान्–सर्वविधसामर्थ्यशाली । भवानीपतिः–शङ्करः । अस्य धर्मस्य–कापालिकाचारस्य । महिमानम्–प्रभावम् ।

भिक्षु—बुद्ध, बुद्ध, अरे बड़ी भयङ्कर धर्मचर्या है ।

क्षपणक—अर्हन् , अर्हन् , अहा किसी घोर पापीने इस बेचारे को ठग लिया है ।

कापालिक—( सक्रोध ) आः पापी पाखण्ड, मुण्डितमस्तक, केशलुञ्चक, अरे वञ्चक, चतुर्दश भुवनके उत्पत्तिस्थितिप्रलयके प्रवर्तक वेदान्तप्रसिद्धसिद्धान्त भगवान् शिव धूर्त हैं ? दिखाएँ हम इस धर्म की महत्ता ?

हरिहरसुरज्येष्ठश्रेष्ठान्सुरानहमाहरे
वियति वहतां नक्षत्राणां रुणध्मि गतीरपि ।
सनगनगरीमम्भःपूर्णां विधाय महीमिमां
कलय सकलं भूयस्तोयं क्षणेन पिबामि तत् ॥ १४ ॥

क्षपणकः—अरे कापालिक, अत एव भणामि केनापीन्द्रजालिना मायां दर्शयित्वा विप्रलब्धोऽसीति । ( अले कावालिअ, अदो जेव्व भणामि केणावि इन्दजालिणा माआं दंसीअ विप्पलद्धोऽसि त्ति )

कापालिकः—आः पाप, पुनरपि परमेश्वरमैन्द्रजालिकमित्याक्षिपसि । तन्न मर्षणीयमस्य दौरात्म्यम् । ( खड्गमाकृष्य ) तदलमस्य ।

हरिहरेति॰ अहम् हरिहरौ विष्णुशिवौ सुराः देवा इन्द्रादयः तेषाम् ज्येष्ठान् वयसाऽधिकान् श्रेष्ठान् प्रभावेणाधिकांश्च सुरान् देवान् आहरे आकृष्य नयामि ? अपि वा वियति आकाशे वहताम् चलताम् नक्षत्राणाम् ताराणाम् गतीः गमनानि रुणध्मि वारयामि । सनगनगरीम् पर्वतैः पुरैश्चोपेताम् इमाम् महीम् पृथ्वीम् अम्भःपूर्णाम् विधाय जलप्लावितां कृत्वा—कलय जानीहि—तत् सकलं तोयम् भूयः पुनः क्षणेन पिबामि । देवानां सकलग्रहमाहरणे व्योमचारितारागणगतिरोधे जगतो नगनगरगणयुतस्याम्भसा स्थगने तत्पयसः क्षणेन पुनःपाने च प्रभोर्मम प्रभवतः प्रभावं भावयेति भावः । हरिणीवृत्तम्—तल्लक्षणं यथा—'नसमरसला गः षड्वेदैर्हयैर्हरिणी मता' इति ॥ १४ ॥

अत एव—तवेदृशप्रभावदर्शनक्षमत्वादेव । इन्द्रजालिना—मायादर्शननिपुणेनैन्द्रजालिकेन । मायाम्—इन्द्रजालम् । विप्रलब्धः—वञ्चितः । न मर्षणीयम्—न क्षन्तव्यम् । दौरात्म्यम्—दुष्टता ।

हरिहर प्रभृति देवश्रेष्ठोंको मैं बुला सकता हूँ, आकाशचारी नक्षत्रोंकी गति रोक दे सकता हूँ । पर्वत तथा गांवों से पूर्ण इस नगरीको जलपूर्ण बनाकर उस सारे पानीको देखो, मैं तुरत पी जाता हूँ ॥ १४ ॥

क्षपणक—अरे कापालिक, इसीसे तो कहता हूँ कि किसी ऐन्द्रजालिकने माया दिखाकर ठग लिया है ।

कापालिक—पाप, फिर भी तू परमेश्वरको ऐन्द्रजालिक बताकर उनके ऊपर आक्षेप करता है । तुम्हारी दुष्टता नहीं सही जाती है । ( तलवार खींचकर ) अब इसका—



एतत्करालकरवालनिकृत्तकण्ठ-
नालोच्छलद्बहुलफेनिलबुद्बुदौघैः ।
सार्धं डमड्डमरुडाङ्कृतिहूतभूत-
वर्गेण भर्गगृहिणीं रुधिरैर्धिनोमि ॥ १५ ॥

( इति खड्गमुद्यच्छति )

क्षपणकः—( सभयम् ) महाभाग, अहिंसा परमो धर्मोऽस्ति । ( महाभाअ, अहिंसापलमो धम्मो त्थि ) ( भिक्षोरङ्कं प्रविशति )

भिक्षुः—( कापालिकं वारयन् ) भो भो महाभाग, कौतुकप्रयुक्तवाक्कलहेनायुक्तमेतस्मिंस्तपस्विनि प्रहर्तुम् ।

एतदिति॰—एतदिति हस्तधृतखड्गनिर्देशः, एतेन मम हस्तस्थितेन करालेन भीषणेन करवालेन खड्गेन निकृत्तम् खण्डितं यत्कण्ठनालम् गलधमनी ततः उच्छलद्भिः ऊर्ध्वप्रवाहिभिः बहुलैः भूरिभिः फेनिलबुद्बुदौघैः वेगप्रवृत्ततया फेनयुक्तबुद्बुदसमुदयैः रुधिरैः (करणभूतैः) डमड्डमरुडाङ्कृतिभिः शब्दायमानडमरुशब्दैः आहूतः आकारितः यः भूतानाम् प्रेतानाम् वर्गः गणः तेन सार्धम् सह भर्गगृहिणीम् शिवाम् धिनोमि तर्पयामि । अनेन भीषणेन कृपाणेन तव शिरसि मया छिद्यमाने त्वत्कण्ठनालात् प्रवृत्तानि यानि सबुद्बुदफेनिलरुधिराणि तैः डमरुनादाहूतभूतसहचरीं शिवां तर्पयामीत्यर्थः । वसन्ततिलकं वृत्तम् ॥ १५ ॥

उद्यच्छति—प्रहर्तुमुत्थापयति ।
अहिंसा परमो धर्मोऽस्ति, तेन मा मां हिंसीरिति निवेदनं फलितम् ।
भिक्षोः—बौद्धतपस्विनः ।
कापालिकं वारयन्—खड्गनिपातनादवरुन्धन् । कौतुकप्रयुक्तवाक्कलहेन—कुतूहलप्रवर्तितकथोपकथनेन । एतस्मिन्—जैनसाधौ । प्रहर्तुम्—प्रहारं कर्तुम् ।

इस तलवारसे कण्ठ काटकर कण्ठनालसे निकलते हुए फेनिल बुलबुलोंके समुदायसे डमरुशब्दाहूत भूतगणके साथ शिवभामिनीको तर्पित करता हूँ ॥ १५ ॥

( तलवार उठाता है )

क्षपणक—(भयपूर्वक) महाभाग, अहिंसा परम धर्म है । ( भिक्षुकी गोदमें बैठ जाता है )

भिक्षु—( कापालिकको रोकता हुआ ) अजी महाशय, कौतुकप्रयुक्त बातचीतके कारण इस तपस्विजनपर प्रहार करना अनुचित है ।

कापालिकः—( खड्गं प्रतिसंहरति )

क्षपणकः—( समाश्वस्य ) महाभागो यदि संहृतघोररोषावेशः संवृत्तस्तत्रोऽहं किमपि प्रष्टुमिच्छामि। ( महाभाओ जदि संहलिदघोललोसावेसो संवुत्तो तदो अहं किंवि पुच्छिदुमिच्छेमि )

कापालिकः—पृच्छ।

क्षपणकः—श्रुतो युष्माकं परमो धर्मः। अथ कीदृशः सौख्यमोक्षः। ( सुदो तुम्हाणं पलमो धम्मो। अध केलिसो सोक्खमोक्खो )

कापालिकः—शृणु—

दृष्टं क्वापि सुखं विना न विषयैरानन्दबोधोज्झिता
जीवस्य स्थितिरेव मुक्तिरुपलावस्था कथं प्रार्थ्यते।

प्रतिहरति—नियच्छति।

संहृतघोररोषावेशः—नियन्त्रितभयानककोपावेगः।

सौख्यमोक्षः—आनन्दस्वरूपा मुक्तिः।

दृष्टं क्वापीति० क्वापि कुत्रापि विषयैः स्रक्चन्दनवनितादिभिः विना अन्तरेण सुखम् आनन्दः न दृष्टम् कारणस्यासत्त्वे कार्याभावस्य स्वाभाविकतयाऽऽनन्दकारणत्वेनाभिमतानां स्रक्चन्दनादीनामभावे सुखमशक्यसम्भविभावमिति भावः। ननु मोक्षो नानन्दरूपः किन्तु दुःखाभावरूप एव मोक्षः समाम्नातो नैयायिकैस्तत्राह—उपलावस्था प्रस्तरभावेनावस्थानं जीवस्य स्थितिरेव ( मोक्षः ) सा कथं प्रार्थ्यते केन प्रकारेण पुमर्थो भवति, चेतनस्याचेतनत्वापत्तिर्हानिरेव न लाभ इति तादृश्या मुक्तेरप्रार्थनीयत्वमिति भावः। उपहसितोऽयं मोक्षो नैषधीये श्रीहर्षेण—'मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम्। गोतमं तमवेक्ष्यैव यथा वित्थ तथैव सः' इति।

कापालिक—( तलवारको समेटता है )

क्षपणक—( आश्वस्त होकर ) यदि आप रोषके वेगको रोक चुके हों तो मैं कुछ पूछना चाहता हूँ।

कापालिक—पूछो।

क्षपणक—आपके परम धर्मके विषयमें तो सुन लिया, सौख्यमोक्ष आपका कैसा है?

कापालिक—सुनो—

विषयोंके बिना आनन्द नहीं प्राप्त होता है और शिलाभावरूप मोक्ष जीव क्यों



पार्वत्याः प्रतिरूपया दयितया सानन्दमालिङ्गितो
मुक्तः क्रीडति चन्द्रचूडवपुरित्यूचे मृडानीपतिः॥ १६॥

भिक्षुः—महाभाग, अश्रद्धेयमेतद्वीतरागस्य मुक्तिरिति।

क्षपणकः—अरे कापालिक, यदि न कुप्यसि तर्हि भणामि। शरीरी सरागी मुक्त इति विरुद्धम्। ( अले कावालिअ, जइ ण कुप्पसि तदो भणामि। शलीली सलागी मुक्केति विलुद्धम् )

कापालिकः—( स्वगतम् ) अये, अश्रद्धाक्षिप्तम् अनयोरन्तःकरणम्। भवतु। नैवं तावत्। ( प्रकाशम् ) श्रद्धे, इतस्तावत्।

( ततः प्रविशति कापालिकारूपधारिणी श्रद्धा )

नन्वेवं कीदृशो मोक्षस्तवाभिमत इति चेत्तत्राह—पार्वत्याः हरभार्यायाः गौर्याः प्रतिरूपया मूर्त्या पार्वतीभावं प्राप्तया दयितया स्वभार्यया सानन्दम् आह्लादविशेषोत्पादनया सहर्षम् आलिङ्गितः आश्लिष्टतनुः मुक्तः पाशापगमेन बन्धरहितः चन्द्रचूडवपुः शिवाभिन्नः साधकः क्रीडति विहरति इति मृडानीपतिः शिव ऊचे उक्तवान्। शैवागमानुसारं साधकः शिवरूपस्तद्भार्या पार्वतीरूपा, तयाऽऽलिङ्गितस्य विहारजन्माऽऽनन्दथुरेव मोक्ष इति शिवोक्तिरिति तात्पर्यम्। शार्दूलविक्रीडितं वृत्तम्॥ १६॥

अवीतरागस्य रागयुक्तस्य। रागापगमे हि मुक्तिर्जायते, यदि आयारागः स्थित एव तदा न मुक्तिसम्भव इति। शरीरी सरागी—देहसम्बन्धवान्, रागयुक्तश्च।

अश्रद्धाऽऽक्षिप्तम्—अविश्वासोपहतम्। एतेऽविश्वासोपहता अत एव चेमे मोक्षतत्त्वबोद्धुमशक्ता इति भावः। भवत्वेवं तावत्—यथाऽनयोः श्रद्धा स्यात्तथा यत्नः क्रियतामित्यर्थः।

चाहेगा? अतः पार्वतीके प्रतिरूपमें अवस्थित अपनी प्रियतमासे आलिङ्गित होकर शिवस्वरूप जीव मुक्त हो क्रीडा करता है यह शिवने कहा है॥ १६॥

भिक्षु—इस बात पर श्रद्धा नहीं हो रही है कि बिना विरागके ही मुक्ति होती है।

क्षपणक—अरे कापालिक, यदि क्रोध न करो तो पूछता हूं कि शरीरी और रागवान् मुक्त होता है यह विरुद्ध है।

कापालिक—( स्वगत ) अरे, इन दोनोंका हृदय अश्रद्धासे भरा है। अच्छा रहे। ( प्रकाश ) श्रद्धे, इधर तो आओ।

( कापालिकीरूपमें श्रद्धाका प्रवेश )

करुणा—सखि, पश्य पश्य रजसः सुता श्रद्धा। या एषा—

विस्पष्टनीलोत्पललोललोचना
नरास्थिमालाकृतचारुभूषणा।
नितम्बपीनस्तनभारमन्थरा
विभाति पूर्णेन्दुमुखी विलासिनी॥ १७॥

(सहि, पेक्ख पेक्ख रजसस्सुदा सद्धा। जा एसा—

विप्पट्टणीलुप्पललोललोअणा
णरत्थिमालाकिदचालुभूसणा।
णिअम्बपीणत्थणभालमन्थला
विहादि पुण्णेन्दुमुही विलासिणी॥ १७॥)

श्रद्धा—(परिक्रम्य) एषास्मि। आज्ञापयतु स्वामी। (एसम्हि। आणवेदु सामी)

कापालिकः—प्रिये, एनं दुरभिमानिनं भिक्षुं तावद् गृहाण। (श्रद्धा भिक्षुमालिङ्गति)

रजसः सुता–राजसी।

विस्पष्टेति॰ विस्पष्टे विकसिते ये नीलोत्पले नीलकमले ते इव लोले चपले लोचने यस्याः सा तादृशी विकसितारविन्दस्पर्द्धिचलनयना नरास्थिमालाकृतचारुभूषणा नरास्थिमालाऽलङ्कृता नितम्बयोः श्रोण्योः पीनस्तनयोः स्थूलकुचयोश्च भारेण मन्थरा मन्दगमना पूर्णेन्दुमुखी समग्रशशधरवदना विलासिनी वनिता विभाति शोभते। कापालिक्या नयनशोभाऽलङ्कारसज्जामन्दगतयो नितान्तहृदयङ्गमा अतस्त्वेयं विलासिनी, तेन च मदन्तराकर्षिकेति ध्वनितम्। क्वचित्पुस्तके 'विस्पष्टे'त्यस्य स्थाने 'विभिन्ने'ति पाठः। स्पष्टमन्यत्॥ १७॥

दुरभिमानिनम्–मिथ्याभिमानशालिनम् बौद्धसन्न्यासिनम्। गृहाण–आश्रय।

करुणा—सखि, देखो, यह राजसी श्रद्धा है, जो यह—

विकसित नीलकमल सदृश आँखों वाली तथा नरास्थिमालाभूषिता, नितम्ब तथा पीनस्तन के भारसे मन्दगामिनी पूर्णचन्द्रानना विलासिनी दीख रही है॥ १७॥

श्रद्धा—(चलकर) यहीं तो हूँ, आप आज्ञा दें।

कापालिक—प्रिये, इस दुरभिमानी भिक्षुको आलिङ्गित करो। (श्रद्धा भिक्षुको आलिङ्गन-पाशमें बांधती है),



भिक्षुः—(सानन्दं परिष्वज्य रोमाञ्चमभिनीय जनान्तिकं) अहो, सुखस्पर्शा कापालिकी। तथाहि—

रण्डाः पीनपयोधराः कति मया चण्डानुरागाद् भुज-
द्वन्द्वापीडितपीवरस्तनभरं नो गाढमालिङ्गिताः।
बुद्धेभ्यः शतशः शपे यदि पुनः कुत्रापि कापालिकी
पीनोत्तुङ्गकुचावगूहनभवः प्राप्तः प्रमोदोदयः॥ १८॥

श्रद्धया गृहीते भिक्षौ तस्य हृदये कापालिकोक्तिषु विश्वासः समुत्पत्स्यते, ततश्च तस्याप्याचारः परिवर्त्तनं यास्यति, तदर्थमेव श्रद्धायै भिक्षोरालिङ्गनायाज्ञाप्रदानम्, सा चेयं राजसी श्रद्धा, सात्त्विकी श्रद्धा त्वेषां पार्श्वे नैवोपसर्पतीति बोध्यम्।

सुखस्पर्शा–आनन्दप्रदालिङ्गना।

रण्डा इति॰ मया भिक्षुणा चण्डानुरागात् उत्कटकामावेशवशात् पीनपयोधराः मांसलकुचाः कति रण्डाः चिरमृतपतिकाः स्त्रियः भुजद्वन्द्वेन बाहुभ्याम् आपीडितः यावद्बलं मर्दितः पीवरयोः स्थूलयोः स्तनयोर्भरः भारः यस्यां क्रियायां तस्या गाढम् सर्वांशेनालम्ब्य नो आलिङ्गिताः। अनेकशो मयोत्कटभावेनोद्रिक्तकामविक्रियेण बहवो रण्डाः पीनपयोधरनिर्दयोपमर्दनपूर्वकं यथाविध्याश्लिष्टा इत्यर्थः। बुद्धेभ्यः स्वपरमगुरुभ्यः शतशः शपे शपथं करोमि, यदि पुनः कुत्रापि कस्मिंश्चिदपि रण्डाङ्गालिङ्गने कापालिक्या अस्याः कापालिकदास्याः पीनयोः स्थूलयोः समुत्तुङ्गयोः अपतितयोः कुचयोः अवगूहनम् आश्लेषः तद्भवः तदुदितः प्रमोदोदयः आनन्दोद्गमः प्राप्तः प्रत्यक्षीकृतः। बहवो रण्डा मयाऽऽश्लिष्टाः परमस्याः कापालिक्या आलिङ्गने यः प्रचुरानन्दः स नान्यत्र कुत्रापि दृष्ट इति बुद्धाय शपमानोऽहं ब्रुवे तदत्र मिथ्यात्वमाशङ्कनीयमित्यर्थः। अत्र स्त्रीसामान्यं विहाय रण्डापदोपादानेन तासां चिरानुपयुक्तत्वं तेन तदङ्गानां सुरते समधिकानन्ददायित्वम्, चण्डानुरागादिति पुंस उद्रिक्तभावेन रतिप्रवृत्तौ रतेः सुखमयत्वम्, गाढमिति सर्वाङ्गसङ्गजन्मावैयात्यकृतं प्रकृष्टत्वम्, बुद्धेभ्यः शपे इत्यस्यार्थस्य नितान्तविश्वास्यत्वानुरोधः, कुत्रापीति सर्वरण्डातिशायिसुरतवत्तयाऽस्या वास्तविकं प्रशस्तसुरतत्वमित्यादयोऽर्था व्यज्यन्तेऽत्र। शार्दूलविक्रीडितं वृत्तम्॥ १८॥

भिक्षु—(सानन्द आलिङ्गन करके रोमाञ्चित हो प्रकट हो कर) अहा, कापालिकीका स्पर्श कितना सुखप्रद है। क्योंकि—

प्रचण्ड अनुरागवश दोनों हाथोंसे दोनों पीनस्तनोंको मसलकर कितनी पीनस्तनी राँड़ोंको गले लगाया है—सो बुद्धोंकी शपथ खाता हूँ—कहीं भी इस कापालिकीके पीन तथा उन्नत कुचोंके आलिङ्गनके समान आनन्द नहीं मिला॥ १८॥

अहो पुण्यं कापालिकाचरितमहो श्लाघ्यः सोमसिद्धान्तः। आश्चर्योऽयं धर्मः। भो महाभाग, सर्वथा बुद्धानुशासनमस्माभिरुत्सृष्टम्। प्रविष्टाः स्मः पारमेश्वरं सिद्धान्तम्। तदाचार्यस्त्वं शिष्योऽहम्। प्रवेशय मां पारमेश्वरीं दीक्षाम्।

क्षपणकः—अरे भिक्षो, कापालिकीस्पर्शदूषितस्त्वम्। तद्दूरमपसर। (अले भिक्खुअ, कावालिणीपलसदूसिदे तुमम्। ता दूलं अपसल)

भिक्षुः—आः पाप, वञ्चितोऽसि रे कापालिक्या परिरम्भमहोत्सवेन।

कापालिकः—प्रिये, क्षपणकं गृहाण। (कापालिकी क्षपणकमालिङ्गति)

क्षपणकः—(सरोमाञ्चम्) अहो अर्हन्! अहो अर्हन्! कापालिकयाः स्पर्शसुखम्। सुन्दरि, देहि देहि पुनरप्यङ्कपालीम्। (स्वगतम्) अरे, महान् खल्विन्द्रियविकार उपस्थितः। तदस्ति कोऽप्युपायः। किमत्र युक्तम्। भवतु पिच्छिकया छादयिष्यामि।

---

पुण्यम्-पवित्रम्, श्लाघ्यः-प्रशंसनीयः, सद्य एवासाधारणानन्दप्रदतया श्लाघ्यत्वं बोध्यम्। उत्सृष्टम्-त्यक्तम्। पारमेश्वरम्-शैवागमोक्तम् कापालिकसिद्धान्तम्। दीक्षाम्-उपासनाप्रक्रियार्हतासम्पादयाय गुरुमन्त्रोपदेशम्।

कापालिकीस्पर्शदूषितः-कापालिक्या सह गात्रसम्पर्केण पतितः। अपसर-गच्छ, मा मां स्प्राक्षीरित्यर्थः।

परिरम्भमहोत्सवेन-आलिङ्गनजनितेन प्रमोदेन।

अङ्कपालीम्-ऊरावुपविश्यालिङ्गनम्। इन्द्रियविकारः—ध्वजोत्थानादिरूपः।

---

अहा! धन्य है कापालिकचरित, प्रशंसनीय है सोमसिद्धान्त। महाशय, मैंने सर्वथा बौद्धमत छोड़ दिया। पारमेश्वर मतको मानता हूँ। तुम आचार्य हुए, मैं शिष्य रहा। मुझे परमेश्वर-मतकी दीक्षा दो।

क्षपणक—अरे भिक्षु, तू कापालिकी-स्पर्शसे दूषित हो चुका है, दूर हट।

भिक्षु—आः पाप, तू अभागा है कि कापालिकीके आलिङ्गनसे वञ्चित है।

कापालिक—प्रिये, क्षपणकसे लिपट जा। (कापालिकी क्षपणकसे लिपटती है)

क्षपणक—(रोमाञ्चपूर्वक) अहो अर्हन्, अहो अर्हन्, कापालिकीके स्पर्शमें कितना सुख है। सुन्दरि, दो दो फिरसे आलिङ्गन। (स्वगत) अरे, महान् इन्द्रियविकार उपस्थित है। क्या इसका कोई उपाय है? क्या किया जाय? अच्छा, पिच्छिकासे आच्छादित कर लेता हूं।



अयि पीनघनस्तनशोभने परित्रस्तकुरङ्गविलोचने।
यदि रमसे कापालिकीभावैः श्रावकाः किं करिष्यन्तीति॥ १९॥

अहो कापालिकदर्शनमेवैकं सौख्यमोक्षसाधनम्। भो कापालिक, अहं तव सांप्रतं दासः संवृत्तः। मामपि महाभैरवानुशासने दीक्षय। (अहो अरिहन्त, अहो अरिहन्त, कापालिनीए पलसमुहं। सुन्दलि, देहि देहि पुणोवि अङ्कपालीम्। अरे, महन्तो क्खु इन्दिअविआलो उवत्थिदो। ता अत्थि कोवि उवाओ। किं एत्थ जुत्तम्। भोदु। पिच्छिआए ढंकिस्सम्।

अयि पीणघणत्थणसोहणि पलित्तत्थकुलङ्गविलोअणि।
जइ लमसि कावालिणीभावेहिं सावका किं कलिस्संदि॥

अहो कावालिअदंसणं जेव्व इक्कं सौक्खमोक्खसाहणम्। भो कावालिअ, हग्गे तुहके सम्पदं दासो संवुत्तो। मंपि महाभैरवाणुसासणे दिक्खय)

कापालिकः—उपविश्यताम्।

---

पिच्छिकया-मयूरपुच्छकृतया मार्गमार्जनसाधनतया जैनैरुपयुक्तया 'पिच्छिका' इति प्रसिद्धया। छादयामि-पुंव्यञ्जनमिति शेषः।

अयीति० अयि पीनघनस्तनशोभने पीनौ स्थूलौ घनौ परस्परमिलितौ यौ स्तनौ ताभ्यां शोभने हृद्ये, परित्रस्तकुरङ्गविलोचने भीतहरिणनयने, यदि (त्वम्) कापालिकी भावैः शृङ्गारचेष्टाभिः रमसे मया सह विहरसि, श्रावकाः जैनमतावलम्बिनो गृहस्थाः किङ्करिष्यन्ति न किमपीत्यर्थः। कुप्यन्तु वा श्रावकाः, यत्नेभ्यो रोचेत कुर्वन्तु तत्ते, दत्तो मया जलाञ्जलिस्तेभ्यो यदि त्वं मया सह शृङ्गारचेष्टाभी रमसे तदेत्यर्थः॥ १९॥

सौख्यमोक्षसाधनम्—सौख्यमिश्रितस्यापवर्गस्य। रतेरेव मोक्षतया सौख्ययुत एवं मोक्ष इत्याशयः। महाभैरवानुशासने-शैवागमे। दीक्षय-दीक्षितं कुरु, मन्त्रप्रदानेन प्रवेशयेत्यर्थः।

---

ओ पीन और स्थूल कुचवाली, भयभीतहरिणलोचने कापालिकी, यदि तुम इसी तरह मुझे आलिङ्गन देती रहो तो मुझे श्रावकोंसे क्या लेना देना है॥ १९॥

कापालिकका साक्षात्कार ही सौख्य तथा मोक्षका साधन है। अजी कापालिक, मैं अबसे तुम्हारा दास हूं। मुझे भी महाभैरवानुशासन में दीक्षित कर लो।

कापालिक—बैठो। (दोनों बैठते हैं)

( उभौ तथा कुरुतः )

( कापालिको भाजनं समादाय ध्यानं नाटयति )

श्रद्धा—भगवन्, सुरया पूरितं भाजनम्। (भअवं, सुलाए पूलिदं भाअणम्)

कापालिकः—( पीत्वा शेषं भिक्षुक्षपणकयोरर्पयति )

इदं पवित्रममृतं पीयतां भवभेषजम्।
पशुपाशसमुच्छेदकारणं भैरवोदितम् ॥ २० ॥

( उभौ विमृशतः )

क्षपणकः—अस्माकमार्हतानुशासने सुरापानं नास्ति। (अम्हाणं अलिहन्ताणुसासणे सुलापाणं णत्थि )

भिक्षुः—कथं कापालिकोच्छिष्टां सुरां पास्यामि ?

---

तथा कुरुतः—उपविशत इत्यर्थः।

भाजनम्-पानपात्रम्।

सुरया-मद्येन। पूरितम्-भृतम्। ध्यानमात्रया सुरया स्वयमागत्य पूरितं तव पात्रमित्यर्थः।

इदमिति० पवित्रम् स्वभावपूतम् अमृतम् सुधोपमम् ( सर्वविधसन्तापहरत्वेन सुधासाम्यम् ) भवभेषजम् संसारस्यागमनादिप्रवाहस्य-जन्मजरामरणादिरूपक्लेशपरम्पराया इत्यर्थः, भेषजम् औषधरूपं निवर्त्तकम्, भैरवोदितम् सर्वज्ञमहाभैरवोपदिष्टम् पशुपाशसमुच्छेदकारणम् पशुर्बद्धो जीवस्तस्य पाशो बन्धस्तस्य समुच्छेदे आत्यन्तिकविनाशे कारणम् इदम् सुरारूपम् पीयताम् आस्वाद्यताम्। इयमामन्त्रणोक्तिः सुरापायिनां पानभाजनग्रहणादनन्तरं कर्त्तव्यतया प्रथते ॥ २० ॥

आर्हतानुशासने-जैनागमे। कापालिकोच्छिष्टाम्-कापालिकपीतावशेषाम्।

---

( कापालिक पानपात्र लेकर ध्यानका अभिनय करता है )

श्रद्धा—भगवन्, प्यालेमें शराब भर दी गई।

कापालिक—( पीकर शेष भिक्षु और क्षपणकको देता है )

यह पवित्र अमृत तथा भवभेषज पीओ, जिसे भैरवने पशुपाशसमुच्छेदका कारण कहा है ॥ २० ॥

( दोनों सोचने लगते हैं )

क्षपणक—हमारे जैन मतमें सुरापान नहीं है।

भिक्षु—कापालिककी उच्छिष्ट सुरा कैसे पिऊंगा ?



कापालिक—( विमृश्य जनान्तिकम् ) किं विमृशसि श्रद्धे, पशुत्वमनयोर्नाद्याप्यपनीयते। तेनास्मद्वदनसंसर्गदोषादपवित्रां सुरामेतौ मन्येते। तद्भवती स्ववक्त्रासवपूतां कृत्वानयोरुपनयतु। यतस्तैर्थिका अपि वदन्ति 'स्त्रीमुखं तु सदा शुचि' इति।

श्रद्धा—यद्भगवानाज्ञापयति। ( जं भअवं आणवेदि ) ( पानपात्रं गृहीत्वा पीतशेषमुपनयति )

भिक्षुः—महाप्रसादः ( इति चषकं गृहीत्वा पिबति ) अहो सुरायाः सौन्दर्यम्।

निपीता वेश्याभिः सह न कतिवारान्सुवदना-
मुखोच्छिष्टाऽस्माभिर्विकचबकुलामोदमधुरा।
कपालिन्या वक्त्रासवसुरभिमेतां तु मदिरा-

---

विमृशसि-विचारयसि। अद्यापि-भवत्या कृतालिङ्गनतया कृतार्थने जातेऽपि। पशुत्वम्-मूर्खत्वम् अज्ञानम्। अपनीयते-दूरीक्रियते। अस्मद्वदनसंसर्गदोषात्-मदुच्छिष्टताकलङ्कात्। एतौ भिक्षुक्षपणकौ। स्ववक्त्रासवपूताम्-स्ववक्त्रे कापालिकी मुखे य आसवः मद्यम् तेन पूतां पवित्राम्। अपनयतु-ददातु। स्ववदने निधाय पावयित्वोपहरत्वित्यर्थः। तैर्थिकाः-स्मार्त्ताः।

महाप्रसादः-सुमहाननुग्रहः। सौन्दर्यम् अत्र स्वादप्रकर्षपर्यवसायि।

निपीता इति० अस्माभिः बौद्धभिक्षुभिः विप्रैः वेश्याभिः वाराङ्गनाभिः सह कतिवारान् अनेकधा सुवदनामुखोच्छिष्टा सुन्दरीपीतशेषा विकचबकुलामोदमधुरा विकसितबकुलकुसुमामोदिनी सुरा न पीता आस्वादिता, बहुधा सुरा पीतेति काकुध्वनितम्। कपालिन्याः कापालिन्या अस्याः वक्त्रासवसुरभिम् मुखमदिरासुगन्ध-

---

कापालिक—( सोचकर, प्रकाशरूपमें ) क्या सोचती हो ? श्रद्धे, आज भी इनका पशुत्व दूर नहीं हुआ है। इसीलिये ये हमारी उच्छिष्ट सुराको अपवित्र मानते हैं। इसलिये तुम इसे अपने मुंह लगाकर पवित्र कर दो और इन्हें पिलाओ। क्योंकि शास्त्रकारोंके कथनानुसार स्त्रीमुख सदा पूत है।

श्रद्धा—आपकी जो आज्ञा। ( पानपात्र लेकर जूठा करके देती है )

भिक्षु—महाप्रसाद है। ( प्याला लेकर पीता है ) अहा कितनी अच्छी मदिरा है !

वेश्याओंके साथ स्त्रीमुखोच्छिष्ट बकुलसुगन्धित मदिरा कई बार पी थी, किन्तु कापालिकीके मुखारविन्दसे सुगन्धित इस सुराको नहीं पानेके कारण ही देवोंने अमृतकी

मलब्ध्वा जानीमः स्पृहयति सुधायै सुरगणः ॥ २१ ॥

क्षपणकः—अरे भिक्षो, मा सर्वं पिब। कापालिकीवदनोच्छिष्टां मदिरां मदर्थमपि धारय। ( अले भिक्खुअ, मा सव्वं पिब। कावालिणीवअणोच्छिट्ठं मइलं मदत्थंपि धालेसु )

( भिक्षुः क्षपणकाय चषकमुपनयति )

क्षपणकः—( पीत्वा ) अहो सुराया मधुरत्वम्, अहो स्वादः, अहो सुरभित्वम्। चिरं खलु अर्हदनुशासने निपतितः प्रतिवञ्चितोऽस्मीदृशेन सुरारसेन। अरे भिक्षो, घूर्णन्ति ममाङ्गानि। तर्हि स्वप्स्यामि। ( अहो, सुराए महुलत्तणम्, अहो सादो, अहो गन्धो, अहो सुलहित्तणम्। चिलं खु अलिहन्ताणुसासणे णिवडिदे पडिवञ्चिदोम्हि ईदिसेण सुलालसेण। अले भिक्खुअ, घोलयन्ति मं अङ्गाइं। ता सुविस्सम् )

भिक्षुः—एवं कुर्वः। ( तथा कुरुतः )

युताम् तु एताम् मदिराम् अलब्ध्वा सुरगणः देववर्गः सुधायै अमृताय स्पृहयतीति जानीमः। एतत्कपालिनीवदनार्पितामनुपमेयरसां मदिरां यदिमे देवा नास्वादयन्त एवामीषाममृतस्पृहा, यदीमे तां मदिरामास्वादितवन्तोऽभविष्यन् कदापि ततो न्यूनतमरसेऽमृते बद्धादरा नाभविष्यन्निति भावः। शिखरिणी वृत्तम्, तल्लक्षणं यथा–'रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी' इति ॥ २१ ॥

सर्वम्–निरवशेषम्। कपालिनीवदनोच्छिष्टाम्–एतत्कापालिकीपीतशेषाम्। मदिराम्–सुराम्। धारय–शेषयित्वा रक्ष।

मधुरत्वम्–स्वादयुक्तत्वम्। सुरभित्वम्–सुगन्धः। अर्हदनुशासने–जैनमते। प्रतिवञ्चितः–विमुखीकृतः। सुरारसेन–मदिरास्वादेन। घूर्णन्ति–भ्राम्यन्ति।

स्पृहा की होगी यह मैं मानता हूँ ॥ २१ ॥

क्षपणक—अरे क्षपणक, सब मत पी जा। कापालिकी-पीतशेष सुरा मेरे लिये भी रहने दो।

( भिक्षु क्षपणकको प्याला देता है )

क्षपणक—( पीकर ) अहा सुरा कितनी मीठी है। क्या स्वाद है, क्या गन्ध है, क्या सौरभ है। जैनमतमें पड़कर बहुत दिनों तक इस सुरारस से वञ्चित रहा। अरे भिक्षु, हमारे अङ्ग घूम रहे हैं, सोऊंगा।

भिक्षु—ऐसा ही करेंगे। ( दोनों सोते हैं )



कापालिकः—प्रिये, अमूल्यक्रीतं दासद्वयं लब्धम्। तन्नृत्यावस्तावत्। ( उभौ नृत्यतः )

क्षपणकः—अरे भिक्षुक, एष कापालिकोऽथवाचार्यः कापालिक्या सार्धं शोभनं नृत्यति। तस्मादेताभ्यां सार्धमावामपि नृत्यावः। ( अले भिक्खुअ, एसो कावालिओ अहवा आचालिओ कावालिनीए सह सोहणं णच्चेदि। ता एदाए सह अम्हेवि णच्चावः )

भिक्षुः—आचार्य, महाश्चर्यमेतद्दर्शनम्। यत्राक्लेशमभिमतार्थसिद्धयः संपद्यन्ते।

( मदस्खलितं नृत्यतः )

क्षपणकः—( अयि 'पीनस्तनि' इत्यादि पूर्वमेवोक्त्वा )

कापालिकः—कियदेतदाश्चर्यं पश्यसि।

अत्रानुज्झितचक्षुरादिविषयासङ्गेऽपि सिध्यन्त्यमू-
रत्यासन्नमहोदयाः प्रणयिनाष्यष्टौ महासिद्धयः।

आवाम्–भिक्षुक्षपणकौ।

महदाश्चर्यम्–अत्याश्चर्यकरम्। अक्लेशम्–विनैव कायखेदम्। अभिमतार्थसिद्धयः–ईप्सितपदार्थसिद्धयः। कियदेतत्–अत्यल्पमिदम्।

अत्रानुज्झितेति० अत्र कापालिकमते प्रणयिना समासक्तेन साधकेन अनुज्झितचक्षुरादिविषयासङ्गेऽपि रूपादिलिप्साऽपरित्यागेऽपि अमूः ताः्ताः अष्टौ महासिद्धयः अणिमाद्याः अत्यासन्नमहोदयाः समीपतरवर्त्तिमहाफलाः सत्यः सिध्यन्ति सिद्धा जा-

कापालिक—बिना दामके दो दास मिल गये हैं, चलो, हम दोनों नाचें। ( दोनों नाचते हैं )

क्षपणक—अरे भिक्षु, यह कापालिक अथवा आचार्य कापालिकीके साथ बड़ी अच्छी तरह नाच रहा है, इन दोनोंके साथ हम दोनों भी नाचें।

भिक्षु—आचार्य, यह तो अद्भुतदर्शन है जिसमें बिना कष्टके अभिमत सिद्धि हो जाती है।

( मस्तीमें गिरते-पड़ते नाचते हैं )

क्षपणक—( 'अयि पीनस्तनि' इत्यादि पूर्वोक्त कहकर )

कापालिक—इतने ही में क्या आश्चर्य देखते हो।

इस मतमें विषयके साथ सम्बन्ध कायम रखने पर भी महोदययुत सभी सिद्धियाँ

वश्याकर्षविमोहनप्रशमनप्रक्षोभणोच्चाटन-
प्रायाः प्राकृतसिद्धयस्तु विदुषां योगान्तरायाः परम् ॥ २२॥

क्षपणकः—अरे कापालिक, ( विमृश्य ) अथवा आचार्य, आचार्यराज, कुलाचार्य । (अले कापालिआ, अहवा आचालिआ, आचालिअलाअ, कुलाचालिआ)

भिक्षुः—( विहस्य ) अयमनभ्यासातिशयपीतया मदिरया दूरमुन्मनीकृतस्तपस्वी । तत्क्रियतामस्य मदापनयनम् ।

यन्ते । वश्यम् वशीकरणम्, आकर्षः—आकर्षणम्, मोहनं भ्रान्त्युत्पादनम्, प्रशमनम् सकलप्राक्तनज्ञानभ्रंशः, प्रक्षोभणम्—मनसश्चलीकरणम्, उच्चाटनम् स्थानभ्रंशः, तत्प्रायाः तत्प्रभृतयः प्राकृतसिद्धयः साधारणाः सिद्धयस्तु विदुषाम् विवेकिनाम् परम् अत्यर्थम् योगान्तरायाः योगविघ्नभूताः भवन्तीति शेषः । अत्र कापालिकमते सम्यग् वर्त्तमानेन वैषयिकसुखसमुदायापरित्यागेऽपि तास्ता अणिमादयोऽष्टौ सिद्धयः प्राप्यन्ते यासां महान्ति फलानि समीपतरवर्त्तीनि भवन्ति, प्राकृतसिद्धिषु वशीकरणादिषु तु विदुषामास्था तासां योगप्रतिबन्धकत्वादिति भावः । 'अणिमा महिमा चैव गरिमा लघिमा तथा । प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः' इति सिद्धिनामानि, तत्र येनैश्वर्येणाणुर्भवति सोऽणिमा, येन महान् भवति स महिमा, येन पर्वतादिवद्गुरुर्भवति स गरिमा, येनातिलघुर्भवति स लघिमा, येनाङ्गुल्यग्रेण चन्द्रं स्पृशति स प्राकाम्यनामा, येनैश्वर्येण भूतभौतिकादीनां नियन्ता भवति तदीशित्वम्, येन चेन्द्रियाणि वश्यानि भवन्ति तद्वशित्वम् ॥ २२ ॥

आचार्य—गुरो, आचार्यराज—गुरुवर । 'कुलाचार्य' इदं तान्त्रिकाणां स्वाचार्यसम्बोधनम् ।

अनभ्यासातिशयपीतया—सातिशयपीतया अनभ्यासपीतया च । दूरम्—अत्यर्थम् । उन्मनीकृतः—अचेतनतां गमितः । मदापनयनम्—मददूरीक्रिया ।

आहरणसिद्धिः—आनयनक्षमता । 'स्त्रीषु' इति यथा भवान्मन्त्रोच्चारणमात्रेण सुरामाहृतवान् तथैव किं भवान् स्त्रियः पुरुषाँश्चापि समाहर्त्तुं क्षमत इति प्रश्नार्थः ।

मिलती हैं, वे सिद्धियाँ हैं वशीकरण, आकर्षण, मोहन, प्रशमन, क्षोभण, उच्चाटन । साधारण सिद्धियाँ तो विद्वानोंके योगमें विघ्नकर ही होती हैं ॥ २२ ॥

क्षपणक—अरे कापालिक, ( सोचकर ) अथवा आचार्य, आचार्यराज, कुलाचार्य ।

भिक्षु—( हँसकर ) बिना आदतके इसने अधिक मदिरा पी ली है अतः पागल हो रहा है, इसकी नशा दूर कीजिये ।



कापालिकः—एवं भवतु । (इति स्वमुखोच्छिष्टं ताम्बूलं क्षपणकाय ददाति)

क्षपणकः—( स्वस्थीभूय ) आचार्य, इदं पृच्छामि । यादृशी युष्माकं सुराया आहरणसिद्धिः किं तादृशी सिद्धिः स्त्रीषु पुरुषेष्वप्यस्ति । ( आचालिअ, एव्वं पुच्छिस्सम् । जादिसी तुम्हाणं मलाए आहलणसिद्धी किं तादिसी सिद्धी इत्थिआसु पुलिसेसु अवि अत्थि )

कापालिकः—किं विशेषेण पृच्छ्यते । पश्य—

विद्याधरीं वाथ सुराङ्गनां वा
नागाङ्गनां वाप्यथ यक्षकन्याम् ।
यद्यन्ममेष्टं भुवनत्रयेऽपि
विद्याबलात्तत्तदुपाहरामि ॥ २३ ॥

क्षपणकः—भो, इदं मया गणितेन ज्ञातम् । यत्सर्वेऽपि वयं महामोहस्य किङ्करा इति । ( भो, एदं मए गणिदेण ण्णादं । जं सव्वेवि अम्हे महामोहस्स किंकले त्ति )

किं विशेषेण पृच्छ्यते—सामान्यतः सर्वाहरणे क्षमं प्रति विशेषाहरणक्षमत्वपर्यनुयोगो नोचित इति भावः ।

विद्याधरीमिति॰ विद्याधरीम्—विद्याधरस्त्रियम्, अथवा सुराङ्गनाम् देवललनाम्, वा नागाङ्गनाम् नागपत्नीम्, अथवा यक्षकन्याम् अकृतविवाहाम् यक्षीम्—भुवनत्रितये त्रिभुवने यद्यन्मम इष्टम् अभिलषितम् तत्तत् विद्याबलात् आकर्षणप्रयोजकमन्त्रसिद्धिप्रभावात् उपाहरामि समीपे नयामि, स्पष्टमन्यत् ॥ २३ ॥

सर्वेऽपि वयम्—त्वं कापालिकः, अयं भिक्षुः, अहं क्षपणकश्चेति वयम् ।

कापालिक—ऐसा करो ( अपना जूठा पान क्षपणकको देता है )

क्षपणक—( स्वस्थ होकर ) आचार्य, यह पूछता हूँ, जिस प्रकार आप सुराका आहरण कर सकते हैं उसी प्रकार क्या स्त्रियों और पुरुषोंका भी आहरण कर सकते हैं ।

कापालिक—खास खास वस्तुके लिये क्या पूछते हो ? देखो—

विद्याधरी, देवाङ्गना, नागाङ्गना अथवा यक्षकन्या कोई हो, संसारमें जिसे चाहूँ अपनी विद्याके बलसे आहृत कर सकता हूँ ॥ २३ ॥

क्षपणक—गणितके द्वारा मैं यह जानता हूं कि सभी हम महामोहके किङ्कर हैं ।

उभौ—यथा ज्ञातमायुष्मता । एवमेतत् ।

क्षपणकः—तर्हि राजकार्यं किमपि मन्त्रितव्यम् । ( ता लाअकज्जं किंवि मन्तिदव्वम् )

कापालिकः—कि तत् ।

क्षपणकः—सत्त्वस्य सुता श्रद्धा महाराजस्याज्ञयाह्रियतामिति । ( सत्तस्स सुदा सद्धा महालाअस्स अण्णाए आहलिअदु त्ति )

कापालिकः—कथय कासौ दास्याः पुत्री । एष तामचिरमेव विद्याबलादुपाहरामि ।

( क्षपणकः खटिकामादाय गणयति )

शान्तिः—सखि, अम्बागतमिव हताशानामालापं शृणोमि तदवधानेन तावदाकर्णयावः ।

करुणा—सखि, एवं कुर्मः । ( सहि एव्वं करेम्ह ) ( उभे तथा कुरुतः )

क्षपणकः—( गाथां गणयित्वा )

---

यथा ज्ञातम्-सत्यमवगतम् ।

राजकार्यम्-मोहस्येष्टसिद्धं कर्म । मन्त्रयितव्यम्-चिन्तनीयम् ।

सत्त्वस्य सुता-सात्त्विकी, श्रद्धेत्यस्य विशेषणम् । आह्रियताम्-आकृष्य समीपं प्राप्यताम् । दास्याः पुत्रीति निन्दायाम् ।

अम्बागतम्-मम्मातुः श्रद्धासम्बन्धे । हताशानाम्-नीचानाम् । आलापम्-वार्त्ताम् । अवधानेन-सावधानतया ।

---

दोनों—जैसा तुमने समझा है, ठीक है ।

क्षपणक—तो फिर कुछ राजकार्य सोचना चाहिये ।

कापालिक—वह क्या ?

क्षपणक—सत्त्वसुता श्रद्धा महाराजकी आज्ञासे आहृत की जाय ।

कापालिक—बताओ, वह अभागी कहाँ है ? मैं अभी उसे विद्याबलसे आहृत करता हूँ ।

( क्षपणक खड़ीसे गणना करता है )

शान्ति—सखि, अपनी माँके विषयकी इन अभागोंकी बातें सुन रही हूं, ध्यानसे सुनें ।

करुणा—सखि, वैसा ही करें ( दोनों सुनती हैं )

क्षपणक—( गाथा गिनकर )



नास्ति जले नास्ति स्थले, नास्ति गिरिगह्वरेषु नास्ति पाताले ।
सा विष्णुभक्तिसहिता, वसति हृदये महात्मनाम् ॥ २४ ॥
( णत्थि जले णत्थि थले, णत्थि गिलिगव्हलेसु णत्थि पाआले ।
सा विष्णुभत्तिसहिदा, वसदि हिअए महम्माणम् ॥ )

करुणा—( सानन्दम् ) सखि, दिष्ट्या वर्धसे विष्णुभक्त्या देव्याः पार्श्ववर्तिनी श्रद्धेति । ( सहि दिट्ठिआ वड्ढसि विण्हुभत्तिए देवीए पासवरितणी सद्धेत्ति ) ( शान्तिः हर्षं नाटयति )

भिक्षुः—अथ धर्मस्य कामादपक्रान्तस्य कुत्र प्रवृत्तिः ?

क्षपणकः—( पुनर्गणयित्वा )

नास्ति जले नास्ति वने, नास्ति गिरिह्वरेषु नास्ति पाताले ।
विष्णुभक्त्या सहितो, वसति हृदये महात्मनाम् ॥ २५ ॥
( णत्थि जले णत्थि वणे, णत्थि गिलिगव्हलेसु णत्थि पाआले ।
विष्णुभत्तिए सहिदो, वसदि हिअए, महम्माणम् ॥ )

कापालिकः—(सविषादम्) अहो महत्कष्टमापतितं महाराजस्य। तथाहि—

---

नास्तीति० गिरिगह्वरेषु-पर्वतकन्दरासु । विष्णुभक्तिसहिता-विष्णुभक्तिसहचरी सात्त्विकी श्रद्धा । महात्मनां हृदये वसतीत्यर्थः ॥ २४ ॥

पार्श्ववर्तिनी-समीपस्था ।

कामादपक्रान्तस्य-निष्कामभावेन कृतस्य । प्रवृत्तिः-उपलम्भः ।

नास्तीति० पूर्ववत् । महात्मान एव निष्कामधर्मचारिणोऽतो निष्कामो धर्मस्तेषामेव हृदये स्थातुमर्हतीति भावः ॥ २५ ॥

महत्कष्टम्-अतिदुःखम् ।

---

न जलमें है, न स्थलमें है, न काननकन्दरामें है, न पातालमें है । वह विष्णुभक्तिके साथ महात्माओंके हृदयमें वास करती है ॥ २४ ॥

करुणा—( आनन्दसे ) सखि, तुम बड़ी भाग्यवती हो, श्रद्धा विष्णुभक्तिकी पार्श्ववर्तिनी है । ( शान्ति हर्ष प्रकट करती है )

भिक्षु—और धर्मसे अपक्रान्त कामकी क्या खबर है ?

क्षपणक—( फिर गिनकर )

न स्थलमें है, न जलमें है, न काननकन्दरामें है, न पातालमें है, विष्णुभक्तिके साथ महात्माओंके हृदयमें है ॥ २५ ॥

कापालिक—( विषादके साथ ) महाराजको महान् कष्ट उपस्थित है, क्योंकि—

मूलं देवी सिद्धये विष्णुभक्ति-
स्तां च श्रद्धानुव्रता सत्त्वकन्या।
कामान्मुक्तस्तत्र धर्मोऽप्यभूच्चेत्
सिद्धं मन्ये तद्विवेकस्य कृत्यम् ॥ २६ ॥

तथापि तावदसुव्ययेनापि स्वामिनः प्रयोजनमनुष्ठेयम्। तन्महाभैरवीं विद्यां धर्मश्रद्धयोराहरणाय प्रस्थापयामः। ( इति निष्क्रान्ताः सर्वे )

शान्तिः—आवामप्येवं हताशानां व्यवसायं देव्यै विष्णुभक्त्यै निवेदयावः।

( इति निष्क्रान्ते )

इति श्रीकृष्णमिश्रविरचिते प्रबोधचन्द्रोदयनाम्नि नाटके तृतीयोऽङ्कः ॥ ३ ॥

---

मूलमिति० सिद्धये बोधोदयरूपकार्यनिष्पत्तये मूलम् आदिकारणम् देवी विष्णुभक्तिः, ताम् विष्णुभक्तिञ्च सत्त्वकन्या सात्त्विकी श्रद्धा अनुव्रता अनुगता। चेत् यदि कामान्मुक्तः निष्कामः धर्मोऽपि तत्र विष्णुभक्तिश्रद्धयोः स्थाने तत् तदा विवेकस्य कृत्यम् सिद्धं जातम् मन्ये तर्कये। निष्कामकर्मानुतिष्ठतां सात्त्विकश्रद्धाशालिनाम् विष्णुभक्त्याऽन्तःकरणशुद्धिद्वारा विद्योदयो जायत इति तात्पर्यम् ॥ २६ ॥

असुव्ययेन-प्राणपणेन। स्वामिनः-मोहस्य। प्रयोजनम्-सात्त्विकश्रद्धाविष्णुभक्त्योर्विघटनम्। अनुष्ठेयम्-कर्त्तव्यम्। आहरणाय-आनयनाय, बलादाकृष्यात्रानयनायेति भावः।

एवम्-ईदृशम्, धर्मश्रद्धयोराहरणप्रवृत्तिरूपम्। व्यवसायम्-प्रवृत्तिम्।

इति मैथिलपण्डितश्रीरामचन्द्रमिश्रप्रणीते प्रबोधचन्द्रोदय'प्रकाशे' तृतीयाङ्क'प्रकाशः' ॥

---

सिद्धिका मूल है विष्णुभक्ति, उसके साथ सात्त्विकी श्रद्धा है, कामसे मुक्त होकर धर्म भी अगर वहाँ पहुँच जाय तो समझना चाहिये कि विवेकका कार्य सिद्ध हो गया ॥ २६ ॥

तथापि प्राणव्यय करके भी स्वामीका कार्य करना ही है। अतः धर्म और श्रद्धाको आहृत करने के लिये महाभैरवी विद्याको भेजता हूँ। ( सबका प्रस्थान )

शान्ति—हम दोनों भी इन अभागोंकी गतिविधिको देवी विष्णुभक्तिसे निवेदित करें।

( दोनों जाती हैं )

तृतीय अङ्क समाप्त

# चतुर्थोऽङ्कः

( ततः प्रविशति मैत्री )

मैत्री—श्रुतं मया मुदितायाः सकाशाद्यथा महाभैरवीसङ्ग्रसनसंभ्रमाद्भगवत्या विष्णुभक्त्या परित्राता प्रियसखी श्रद्धेति। तदुत्कण्ठितेन हृदयेन प्रियसखीं श्रद्धां कदा प्रेक्षिष्ये। ( सुदं मए मुदिताए सआसादो जधा महाभैरवीसङ्गसणसम्भमादो भअवदीए विण्हुभत्तिए परित्तादा पिअसही सद्धेति। ता उक्कण्ठिदेण हिअएण पिअसहीं सद्धं कदा पेक्खिस्सम् ) ( परिक्रामति )

( ततः प्रविशति श्रद्धा )

श्रद्धा—( सभयोत्कम्पम् )

घोरां नारकपालकुण्डलवतीं विद्युच्छटां दृष्टिभि-
र्मुञ्चन्तीं विकरालमूर्तिमनलज्वालापिशङ्गैः कचैः।

---

मैत्री-मैत्रीकरुणामुदितोपेक्षा नाम चतस्रो वृत्तयो मताः, तास्वेकतमा मैत्री। महाभैरवीसङ्ग्रसनसम्भ्रमात्-महाभैरवी कापालिकप्रेषिता पिशाली श्रद्धामाहर्त्तुमायाता तथा सङ्ग्रसनं पीडनमाहरणार्थं बलाद् ग्रहणं, ततः संभ्रमः भयम्, तस्मात्। उत्कण्ठितेन-उत्कलिकाऽऽकुलेन। कस्या अपि सख्या महतोऽनर्थकराद्व्यसनात्त्राणे जाते श्रुततदीयवृत्तान्तायास्तदीयायाः सख्यास्तद्दर्शनोत्कण्ठास्वभावसिद्धा समाजोचिता चेति प्रसिद्धधनुरोधेनायं ग्रन्थः।

सभयोत्कम्पम्-भयकृतेन कम्पेन सह। भयनिवृत्तावपि भयकृतः कम्पश्चिरमनुवर्त्तत इति श्रद्धायाः कम्पो वर्ण्यते।

घोरमिति० घोराम् भीषणाकृतिम्, नारकपालकुण्डलवतीम् नृमुण्डकृतकुण्डलभूषणाम्, दृष्टिभिः उग्रदृष्टिपातैः विद्युच्छटाम् शम्पासम्पातम् मुञ्चन्तीम् बहिर्भावयन्तीम्, अनलज्वालापिशङ्गैः वह्निशिखाकपिलैः कचैः केशैः विकरालमूर्त्तिम् भय-

---

( मैत्रीका प्रवेश )

मैत्री—मैंने मुदिताके मुंहसे सुना है कि भैरवी द्वारा ग्रस्त होनेसे श्रद्धाको भगवती विष्णुभक्तिने बचा लिया है। अतः उत्कण्ठित हृदयसे प्रियसखी श्रद्धाको कब देखूंगी। ( चलती है )

( श्रद्धाका प्रवेश )

श्रद्धा—( भयसे कम्पित होकर ) भयानक नरकपालका कुण्डल धारण करनेवाली, दृष्टिसे विद्युच्छटा प्रकट करनेवाली, विकराल-मूर्ति, आगकी लपट सदृश केशधारिणी,